श्रीहरये नमः

भूम्यादिपूजनसहित

शिलान्यासपद्धतिः

पण्डित गङ्गाधर पाठक

मुख्य आचार्य- श्रीरामजन्मभूमिशिलापूजन अयोध्या

श्रीमिथिला-वृन्दावनधाम

श्रीमद्वास्तुपुरुषाय नमः

भूम्यादिपूजनसहितशिलान्यासपद्धतिः

श्रीगणेशं गिरं कालीं मातापितृगुरून्महीम् ।
वास्तुकर्म शुभं कर्तुं कुर्वे पद्धतिमुत्तमाम् ।।

भगवत्कृपया देवालयादिकर्तुमुद्यतो भाग्यवान्मनुष्यः सम्मुखकालरहिते समये, सौरक्रमेण वैशाखाषाढ(आषाढे पशुगृहं त्यक्त्वा)कार्त्तिकमार्गफाल्गुन–श्रावणमासेषु, शुक्लपक्षे, कृष्णे ५ यावत्, **२-३-५-७-१०-११-१२-१३-१५** तिथिषु, सूर्यभात् **५-७-९-१२-१९-२६** पृथ्वीशयननक्षत्रदिनं विहाय, अश्विनीरोहिणीमृगशिरःपुनर्वसुपुष्योत्तरात्रयहस्तचित्रास्वात्यनुराधामूलश्रवणधनिष्ठाशतभिषग्रेवतीनक्षत्रेषु, चन्द्रबुधबृहस्पतिशुक्रशनिवारेषु, दिवा, शुद्धसमये, शुद्धवृषवास्तुचक्रे, **२-३-५-६-८-९-११-१२** लग्नेषु शुभदृग्युतेषु, **१-४-५-७-९-१०** स्थितैः शुभग्रहैः, **३-६-११** स्थितैः पापग्रहैः, **८-१२** ग्रहरहिते, सूर्यचन्द्रतारादिबलान्विते सुमुहूर्ते शिल्पशास्त्रोक्तरीत्या यथोचितं मार्जन–दहन–खनन–सम्प्लावनादिभिर्धर्मशास्त्राद्युक्तैः शोधनोपायैर्भूमिं सर्वतोभावेन संशोध्य देवालये चिकीर्षिते **१२-१-२** राशिस्थसूर्य आग्नेयकोणे **३-४-५** सूर्य ईशानकोणे **६-७-८** सूर्ये वायव्यकोणे **९-१०-११** सूर्ये च नैर्ऋत्यकोणे खातं कुर्यात् । प्रासादारम्भे **५-६-७** राशिस्थसूर्य आग्नेये **८-९-१०** सूर्य ईशाने **११-१२-१** सूर्ये वायव्ये **२-३-४** सूर्ये च नैर्ऋत्यकोणे खातं कुर्यात् ।

देवालयस्यान्यप्रासादस्य वा निर्विघ्नतासिद्ध्यर्थं कृतनित्यक्रियः सम्भृतसम्भारः सपत्नीकः सशिखयज्ञोपवीती द्विजयजमानो विहितासनोपरि पूर्वाभिमुख उपविश्य यथोक्तं कर्म कुर्यात् । तत्र रक्तवस्त्रोपरि गोधूममण्डले गणपतिस्थापनम्, पीतवस्त्रे तण्डुलाष्टदलस्थकलशपूर्णपात्रस्य उपरि वस्त्रोपरि वा तण्डुलैस्त्रीन्पुञ्जान् कृत्वा तदुपरि पूगीफलानि निधाय तत्र **भूमिकूर्मानन्तवराहदेवतानामाचाराद्वास्तुपुरुषस्य** च पूजनं कुर्यात् । तद्यथा–

आसनपवित्रकरणम्

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ।।

कुंकुमाक्षततिलककरणम्

तिलकं वन्द्यते नित्यं पवित्रं पापनाशनम् ।
आपदां हरते नित्यं लक्ष्मीर्वसतु सर्वदा ।।
अक्षतान् विप्रहस्तात्तु नित्यं गृह्णाति यो नरः ।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम् ।।

शिखाबन्धनम्

चिद्रूपिणि महामाये दिव्यतेजःसमन्विते ।
तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्व मे ।।

यजमानदक्षिणहस्ते पत्न्या वामहस्ते रक्षासूत्रबन्धनम्

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामनुबध्नामि रक्षे मा चल मा चल ।।

द्विराचमनम्

ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । हस्तप्रक्षालनम्- **ॐ गोविन्दाय नमः ।** ओष्ठप्रक्षालनम्- **ॐ हृषीकेशाय नमः ।** पुनस्तूष्णीं हस्तप्रक्षालनम् ।

प्राणायामाः

आत्मनः समन्तात्प्रदक्षिणवदुदकक्षेपणम् । तत्रादौ पूरके ''**ॐ नमो भगवते वासुदेवाय**'' अंगुष्ठेन दक्षिणनासापुटपीडनपूर्वकं मनसा विष्णुध्यानं कुर्यात् । कुम्भके सर्वांगुलीभिर्वामनासापुटपीडनपूर्वकं मनसा ब्रह्मणो ध्यानं कुर्यात् । तदनन्तरं शिवध्यानपूर्वकं दक्षिणनासापुटेन रेचनं कुर्यात् । (टि- पञ्चांगुलीभिर्नासाग्रं पीडयेत्प्रणवेन वै । मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः । कनिष्ठानामिकांगुष्ठैर्यतेश्च ब्रह्मचारिणः ।। आसू.)

पवित्रीकरणम्

यजमानः सव्यहस्ते त्रिकुशमयं दक्षिणहस्ते द्विकुशपवित्रं च धारयेत् ।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ पुण्डरीकाक्षः पुनातु । इति मन्त्रेण वारत्रयं कुशोदकैरात्मानं पूजासामग्रीं च सम्प्रोक्ष्य हस्ते कुंकुमार्चिताक्षतपुष्पाणि गृहीत्वा स्वस्तिमन्त्रान् पठेत् । स्वयमपि पाठकर्तुमसमर्थो यदि यजमानः स्यात्तदा बद्धाञ्जलिः ब्राह्मणद्वारा क्रियमाणं पाठं संशृणुयात् ।

स्वस्तिवाचनम्

हस्तेऽक्षतपुष्पाण्यादाय- **ॐ स्वस्ति नऽइन्द्रो व्वृद्धश्श्रवाः स्वस्ति नः पूषा व्विश्श्ववेदाः । स्वस्ति नस्ताक्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ॥१॥ पृषदश्श्वा मरुतः पृश्निमातरः शुभँय्यावानो व्विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो व्विश्श्वे नो देवाऽअवसा गमन्निह ॥२॥ भद्द्रं कर्ण्णेभिः श्शृणुयाम देवा भद्द्रम्पश्श्येमाक्क्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्ँसस्तनूभिर्व्व्यशेमहि देवहितँय्यदायुः ॥३॥ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्च्चक्क्राजरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्ग्गन्तोः ॥४॥ अदितिर्द्द्यौरदितिरन्तरिक्क्षमदितिर्म्माता सपिता सपुत्रः । व्विश्श्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥५॥ द्यौः शान्तिरन्तरिक्क्षग्ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्प्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्ब्रह्म्म शान्तिः सर्व्वग्ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥६॥ ॐ यतो यतः समीहसे ततो नोऽअभयं कुरु । शन्नः कुरु प्प्रजाब्भ्योऽभयन्नः पशुब्भ्यः ॥७॥ ॐ शान्तिः शान्तिः सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु । अयमारम्भः शुभाय भवतु । अमृतारम्भो भवतु । देवाऽआयान्तु यातुधानाऽअपयान्तु विष्णो देवयजनं रक्षस्व ।**

ॐ श्रीमन्महागणाधिपतये नमः । ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ उमामहेश्वराभ्यां नमः । ॐ वाणीहिरण्यगर्भाभ्यां नमः । ॐ शचीपुरन्दराभ्यां नमः । ॐ मातापितृचरणकमलेभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ

कुलदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सुरभ्यै नमः । ॐ एतत्कर्मप्रधानदेवताभ्यो नमः । ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥३॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥४॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥६॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥७॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥८॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥९॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१०॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥११॥ स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥१२॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१३॥ विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥१४॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥१५॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥१६॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।१७॥ अयोध्यां मिथिलां काशीं हरिद्वारं सरिद्वराम् । वृन्दावनं चित्रकूटं ध्यात्वा कर्म समारभेत् ॥१८॥ इति देवतानमस्कारान् कृत्वा हस्ते त्रिकुशजलाक्षतपुष्पाणि आदाय सङ्कल्पं कुर्यात् ।

सङ्कल्पः

हस्ते त्रिकुशतिलजलान्यादाय- **विष्णुर्विष्णुर्विष्णुः । ॐ तत्सत् । नमः श्रीपरमात्मने । ॐ अद्य श्रीब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे अमुकप्रदेशे अमुकक्षेत्रे अमुकनामसम्वत्सरे अमुकर्तौ अमुकायने अमुकगोले अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकराशिस्थिते चन्द्रेऽमुकराशिस्थिते श्रीमद्भास्करे अमुकामुकराशिस्थितेषु भौमबुधगुरुशुक्रशनिषु सत्सु एवं ग्रहगुणगणविशिष्टायां शुभपुण्यवेलायाममुकगोत्रः अमुकशर्मा (वर्मा, गुप्तः) सपत्नीकोऽहं ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम सकुटुम्बस्य सकलग्रामजनभक्तजनदेशजनानां च सकलारिष्टदुर्निमित्तोपशमन-पुरःसरं निखिलक्षेमसुभिक्षकल्याणप्राप्तये अमुकदेवताप्रीतये निर्मास्यमाननूतन-प्रासादाङ्गभूतं भूम्यादिदेवतापूजनं खातपूजनं शिलास्थापनं च करिष्ये ।**

पुनर्जलमादाय- **तदङ्गत्वेनासनविधिं दिग्रक्षणं भैरवनमस्कारं कलशार्चनं दीपपूजनं निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं पञ्चप्रैषवाक्यैः स्वस्तिपुण्याहवाचनं (मातृकापूजनं वसोर्धारापूजनं नान्दीश्राद्धं) ऋत्विग्वरणं पञ्चगव्यकरणं भूमिपूजनम् अग्निस्थापनं वास्तुदेवतास्थापनं बलिदानं (ग्रहस्थापनं) विहितहवनं शिलास्नपनं शिलास्थापनं च करिष्ये ।। ॐ यज्जाग्रतो...तन्मे मनः शिवसंकल्पमस्तु ३ ।।**

दिग्रक्षणम्

वामहस्ते गौरसर्षपानादाय दक्षिणेनाच्छाद्य- **अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ।। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन शान्तिकर्मसमारभे ।। यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।। भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः । ते सर्वेऽप्यपगच्छन्तु वास्तुकर्मकरोम्यहम् ।।** एतैर्मन्त्रैः सर्वदिक्षु सर्षपान्विकीर्य छोटिकया तालत्रयेणान्तरिक्षान्भूतानुत्सार्य वामपादपार्ष्णिना त्रिवारं भूमिं ताडयेत् । ततः शरीरशुद्ध्यर्थं वामहस्ते जलं गृहीत्वा दक्षिणहस्तानामिकया **नेत्रस्पर्शनं** कुर्यात् ।

भैरवनमस्कार:

तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

इत्यनुज्ञां गृहीत्वा स्ववामे पूजार्थं जलपूरितकर्मकलशार्चनं कुर्यात् ।

कर्मकलशार्चनम्

स्ववामभागेऽष्टदलाक्षतपुञ्जोपरि सुवासितजलपूर्णं कलशं संस्थाप्य तत्र वरुणमावाहयेत् । हस्तेऽक्षतान् गृहीत्वा- **आवाहयामि देवेशं वरुणं यादसाम्पतिम् । पापक्षयकरं दिव्यं कलशेऽस्मिन् शुभावहम् ॥** अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि । **प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता । प्रतिष्ठां ते करोम्यद्य कलशे दैवतैः सह ॥** ॐ वरुणाय नमः वरुण सुप्रतिष्ठितो वरदो भव ।

ततः पूजनम्- पूर्वे **ॐ ऋग्वेदाय नमः।** दक्षिणे **ॐ यजुर्वेदाय नमः ।** पश्चिमे **ॐ सामवेदाय नमः ।** उत्तरे **ॐ अथर्ववेदाय नमः ।** कलशमध्ये **ॐ अप्पतिवरुणाय नमः ।** यथोपचारैः पूजयेत् वा (सर्वोपचारार्थे) गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि इति कुर्यात् । ततोऽनामिकया कलशं स्पृष्ट्वा कलशजलमभिमन्त्रयेत् । **गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ ॐ गङ्गादिनदीभ्यो नमः** । पुनः अंकुशमुद्रया सूर्यमण्डलात्सर्वाणि तीर्थान्यावाह्य **'वम्'** इति धेनुमुद्रया अमृतीकृत्य **'हुम्'** इति कवचेनावगुण्ठ्य मत्स्यमुद्रयाऽऽच्छाद्य **'वं वरुणाय नमः'** इत्यनेनाष्टवारमभिमन्त्र्य प्रार्थयेत्- **पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पूजनं क्रियते यावत्तावत्त्वं सन्निधो भव ॥** इति सम्प्रार्थ्य वामहस्ते तस्मादुदकादुदकं गृहीत्वा दक्षिणहस्तेन स्वात्मानं सम्प्रोक्षेत्- **अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥** पुनस्तदुदकमादाय पूजासम्भारान् पूजाभूमिञ्च सम्प्रोक्षयेत् ।

पञ्चगव्यकरणम्

(गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । पञ्चगव्यमिदं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ।।
पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते । घृतं च पलमात्रं स्याद्गोमयं तोलकद्वयम् ।।
दधि प्रसृतिमात्रं स्यात्पञ्चगव्यमिदं स्मृतम् ।।)

यजमानः कश्चिद् ब्राह्मणो वा स्वसमीपे कांस्यपात्रं निधाय तत्र क्रमेण समन्त्रकं गोमूत्रादिकं क्षिपेत् । तद्यथा गोमूत्रम्- **गोमूत्रं सर्वशुद्ध्यर्थं पवित्रं पापशोधनम् । आपदां हरते नित्यं पात्रे तन्निक्षिपाम्यहम् ।।** गोमयम्- **अग्रमग्रं चरन्तीनामोषधीनां रसोद्भवम् । तासां वृषभपत्नीनां गोमयं तत्क्षिपाम्यहम् ।।** क्षीरम्- **पयः पुण्यतमं प्रोक्तं धेनुभ्यश्च समुद्भवम् । सर्वशुद्धिकरं दिव्यं पात्रे तन्निक्षिपाम्यहम् ।।** दधि- **चन्द्रकुन्दसमं शीतं स्वच्छं वारिविवर्जितम् । दधि प्रीतिकरं दिव्यं पात्रे तन्निक्षिपाम्यहम् ।।** आज्यम्- **घृतं शुद्धं महद्दिव्यं पवित्रं पापशोधनम् । सर्वपुष्टिकरं चैव पात्रे तन्निक्षिपाम्यहम् ।।** कुशोदकम्- **कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः । कुशाग्रे शङ्करः साक्षात्तेन पूतं कुशोदकम् ।।** इति पञ्चगव्यं कृत्वा कुशेन यज्ञकाष्ठेन वाऽऽलोड्य प्रणवेनाभिमन्त्र्य पूजासम्भारान् कर्मभूमिं च प्रोक्षयेत् । ततो दक्षिणहस्तेन पञ्चगव्यमादाय पूर्वाभिमुखः प्राशयेत्- **यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके । प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ।।** स्त्रीशूद्रौ विप्रैः पञ्चगव्यं कारयित्वा तूष्णीं पिबेतान्न वेति ।

दीपपूजनम्

घृतदीपं प्रज्वाल्य देवतादक्षिणे स्ववामभागे निर्वातस्थले निधाय- **जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् । तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ।। ॐ दीपदेवतायै नमः** इति सम्पूज्य नमस्कुर्यात्- **ॐ ज्योतिर्लक्ष्म्यै च विद्महे दीपद्युत्यै च धीमहि । तन्नो ज्योतिः प्रचोदयात् ।। भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत्पूजासमाप्तिः स्यात्तावत्त्वं सुस्थिरो भव ।। अनेन पूजनेन दीपस्थदेवता प्रीयतां न मम ।।**

गणपतिपूजनम्

ताम्रपात्रे **सिद्धिबुद्धिसहितं महागणपतिं** संस्थाप्य हस्ते गन्धाक्षतपुष्पाण्यादाय **ध्यायेत्-**

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः
क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम् ।
दोर्भिः पाशांकुशाब्जाभयवरदधतं चन्द्रमौलिं त्रिनेत्रं
ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥

ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ध्यानं समर्पयामि।

आवाहनम्- ॐ गणानान्त्वा गणपतिग्गूं हवामहे प्प्रियाणान्त्वा प्प्रियपतिग्गूं हवामहे निधीनान्त्वा निधिपतिग्गूं हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्त्वमजासि गर्ब्भधम् ॥ हे हेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज । सिद्धिबुद्धियुतोऽध्यक्ष लक्षलाभपितः प्रभो ॥ ॐ सिद्धिबुद्धिसहितश्रीमन्महागणाधिपतये नमः आवाहनं समर्पयामि ।

प्रतिष्ठापनम्- ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमं तनोत्वरिष्ट्टंय्यज्ज्ञग्गूंसमिमं दधातु । व्विश्श्वेदेवासऽइहमादयन्तामो॥३ँम् प्रतिष्ठ्ठ ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥ सिद्धिबुद्धिसहित श्रीमन्महागणाधिपते सुप्रतिष्ठितो वरदो भव । **आसनं** समर्पयामि । **पाद्यम् । अर्घ्यम्** । **आचमनीयम्** ।

पञ्चामृतस्नानम्- पयो दधि घृतं चैव मधु च शर्करायुतम् । स्नानार्थं ते प्रयच्छामि गृहाण त्वं प्रसीद मे ॥ पञ्चामृतस्नानम् । शुद्धोदकस्नानम् । आचमनीयम् । **गन्धोदकस्नानम्- मलयाचलसम्भूतचन्दनागरुसंयुतम् । गन्धोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥** गन्धोदकस्नानं शुद्धोदकस्नानं च । आचमनीयम् । **उद्वर्तनस्नानम्- नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥** उद्वर्तनस्नानम् । शुद्धोदकस्नानम् । आचमनीयम् ।

ततः पञ्चामृताङ्गपूजनत्वेन सर्वोपचारार्थे गन्धाक्षतपुष्पैः सम्पूज्य निर्माल्यमुत्तरे विसृज्य अभिषेकं कुर्यात्–

नारद उवाच

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये ।।१।। प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् । तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकम् ।।२।। लम्बोदरं पंचमं च षष्ठं विकटमेव च । सप्तमं विघ्नराजं च धूम्रवर्णं तथाऽष्टमम् ।।३।। नवमं भालचन्द्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननम् ।।४।। द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः । न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ।।५।। विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ।।६।। जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् । सम्वत्सरेण सिद्धिं च लभते नात्र संशयः ।।७।। अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः।।८।। अमृताभिषेकस्नानं समर्पयामि।

शुद्धोदकस्नानम्- गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनया हृतम् । तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यताम् ।। शुद्धोदकस्नानम् । आचमनीयम् । ततो गणपतिं शुष्कवस्त्रेण प्रोञ्छयित्वा रक्तवस्त्रोपरि गोधूमादिनिर्मिताष्टदले पीठे वा स्वसमीपे संस्थापयेत् । **वस्त्रम्- सर्वभूषाधिकं सौम्यं लोकलज्जानिवारणम् । मयोपपादितं तुभ्यं गृह्यतां वस्त्रमुत्तमम् ।।** वस्त्रम् । आचमनीयम् । उपवीतम्– **नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं मया दत्तं गृहाण गणनायक ।।** यज्ञोपवीतम् । आचमनीयम् । **गन्धविलेपनम्- श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं मया दत्तं श्रीगणेश प्रगृह्यताम् ।।** गन्धम् । अक्षतान् । **पुष्पाणि- माल्यादीनि सुगन्धीनि मालत्यादीनि वै विभो । आनीतानि सुपुष्पाणि पूजनाय गृहाण ते ।।** पुष्पं पुष्पमाल्यं च । **दूर्वाकुराः- दूर्वा ह्यमृतसम्पन्ना शतमूला शतांकुरा । शतं पातकसंहन्त्री शतमायुष्यवर्द्धिनी ।।** दूर्वाकुरान् । **सौभाग्यद्रव्यम्- श्वेतचूर्णं रक्तचूर्णं हरिद्रां कुंकुमं तथा । सौभाग्यद्रव्यं दास्यामि ससिन्दूरं गृहाण ते ।।** सौभाग्यद्रव्यम् । **धूपः- वनस्पतिरसोद्भूतो**

गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ धूपमाघ्रापयामि । **दीपः- साज्यं च वर्त्तिसंयुक्तमग्निना योजितं मया । दीपं गृहाण सम्प्रीत्या त्रैलोक्यतिमिरापहम् ॥** दीपं दर्शयामि । हस्तप्रक्षालनम् । **नैवेद्यम्- शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च । आहारं भक्ष्यभोज्यान्नं नैवेद्यं प्रतिगृह्यताम् ॥** जलेन नैवेद्यं सम्प्रोक्ष्य धेनुमुद्रयामृतीकृत्य ग्रासमुद्राः प्रदर्शयेत्। **ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा ।** नैवेद्यं निवेदयामि । पूर्वापोशानम् । नैवेद्यमध्ये **पानीयम्- एलोशीरलवङ्गादिकर्पूरपरिवासितम् । प्राशनार्थं कृतं तोयं गृहाण सलिलं शुभम् ॥** मध्ये पानीयम् । उत्तरापोशानम् । हस्तप्रक्षालनम् । मुखप्रक्षालनम् । आचमनीयम् । करोद्वर्तनार्थे गन्धम् । **पूगीफलताम्बूलम्- पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥** मुखवासार्थे ताम्बूलम् । **ऋतुफलम्- इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥** ऋतुफलम् । **दक्षिणा- हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः। अनन्तपुण्यफलदां दक्षिणामर्पयाम्यहम्॥** पूजासाद्गुण्यार्थे दक्षिणां समर्पयामि । **कर्पूरनीराजनम्-** (नीराजनीं प्रक्षाल्य ''ॐ **नीराजन्यै नमः**'' इति सम्पूज्य नीराजनं कुर्यात्) **कदलीगर्भसम्भूतकर्पूरेण प्रदीपितम् । नीराजनमहं कुर्वे पश्य मे वरदो भव ॥** नीराजनम् । आचाराद्देववन्दनम् । हस्ताभ्यामात्मवन्दनम् । हस्तप्रक्षालनम्। **पुष्पाञ्जलिः-** अञ्जलौ पुष्पाण्यादाय- **अविरलमदजलनिवहं भ्रमरशतानीकसेवितकपोलम् । अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥** पुष्पाञ्जलिम् । **त्रिप्रदक्षिणम्- यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्ति प्रदक्षिणपद पदे ॥** त्रिप्रदक्षिणम् । **विशेषार्घः-** ताम्रपात्रे जलं गृहीत्वा तत्र गन्धाक्षतपुष्पद्रव्याणि निक्षिप्य तदुपरि नारिकेलं च निधाय हस्तद्वयेन विशेषार्घं दद्यात्- **रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयङ्कर्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरद त्वं वरं**

देहि वाञ्छितं वांछितार्थद ॥ अनेन सफलार्घेण सफलोऽस्तु सदा मम ॥ विशेषार्घम् । ततः **प्रार्थना- लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् । तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥** प्रार्थनापूर्वकं नमस्कारान् निवेदयामि । **समर्पणम्-** हस्ते जलमादाय- **अनेन यथोपचारैः कृतपूजनेन साङ्गः सपरिवारः सिद्धिबुद्धिसहितः श्रीमन्महागणाधिपतिः प्रीयतां न मम ॥** इति ।

कलशस्थापनपूजनम्

स्वपुरतः शुद्धभूमौ वेद्यां वाऽष्टदलोपरि कलशं स्थापयेत् । **भूमिस्पर्शनम्- उद्धृताऽसि वराहेण कृष्णेन शतबाहुना । नमस्ते सर्वलोकानामसुधारिणि सुव्रते ॥** भूमौ **यवप्रक्षेपः- यवोऽसि धान्यराजस्त्वं सर्वोत्पत्तिकरः शुभः । प्राणिनां जीवनोपायस्त्वां भूमौ प्रक्षिपाम्यहम् ॥ कलशस्थापनम्- हेमरूप्यादिसम्भूतं ताम्रजं सुदृढं नवम् । अच्छिद्रं धौतकल्माषं कलशं स्थापयाम्यहम् ॥** कलशे **जलपूरणम्- जीवनं सर्वजीवानां पावनं पावनात्परम् । बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम् ॥ गन्धप्रक्षेपः- केशरागरुकङ्कोलघनसारसमन्वितम् । मृगनाभियुतं गन्धं कलशे प्रक्षिपाम्यहम् ॥ धान्यप्रक्षेपः- धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम् । बलप्रदां तु सर्वेषां कलशे प्रक्षिपाम्यहम् ॥ सर्वोषधीप्रक्षेपः- ओषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः । दूर्वासर्षपसंयुक्ताः कलशे प्रक्षिपाम्यहम् ॥ दूर्वाप्रक्षेपः- दूर्वाममृतसम्पन्नां शतमूलां शतांकुराम् । शतं पातकसंहन्त्रीं कलशे प्रक्षिपाम्यहम् ॥ पञ्चपल्लवप्रक्षेपः- अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः । पञ्चैतान् पल्लवानस्मिन्कलशे स्थापयाम्यहम् ॥** सप्तमृत्प्रक्षेपः- **अश्वस्थानाद् गजस्थानाद् वल्मीकात्सङ्गमाद्धदात् । राजस्थानाच्च गोष्ठाच्च मृदमानीय निक्षिपे ॥ फलप्रक्षेपः- पूगीफलमिदं दिव्यं पवित्रं पापनाशनम् । पुत्रपौत्रादिफलदं कलशे प्रक्षिपाम्यहम् ॥ पञ्चरत्नप्रक्षेपः- वज्रमौक्तिकवैदूर्यपुष्परागेन्द्रनीलकम् । एतानि**

पञ्चरत्नानि कलशे प्रक्षिपाम्यहम् ॥ हिरण्यप्रक्षेपः- हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः । अनन्तपण्यफलदं कलशे प्रक्षिपाम्यहम् ॥ रक्तसूत्रेण वस्त्रेण वा **कलशवेष्टनम्- सूत्रं कार्पाससम्भूतं ब्रह्मणा निर्मितं पुरा । येन बद्धं जगत्तेन कलशं वेष्टयाम्यहम् ॥ पूर्णपात्रनिधानम्- पिधानं सर्ववस्तूनां सर्वकार्यार्थसाधनम् । पूर्णपात्रमिदं दिव्यं कलशे स्थापयाम्यहम् ॥ नालिकेरादीनां स्थापनम्- फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात्फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥** यजमानो हस्तेऽक्षतानादाय तत्र **वरुणमावाहयेत्- आवाहयामि देवेशं वरुणं यादसाम्पतिम् । पापनाशकरं दिव्यं कलशेऽस्मिन् शुभावहम् ॥** अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि ।। **प्रतिष्ठापनम्- ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमन्तनोत्वरिष्ट्टंय्यज्ज्ञग्गूं समिमन्दधातु । व्विश्श्वेदेवासऽइहमादयन्तामो॥३ँम्प्रतिष्ठ्ठ ॥ प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता । प्रतिष्ठां ते करोम्यद्य कलशे दैवतैः सह ॥ ''ॐ वरुणाय नमः''** सपरिकर वरुण सुप्रतिष्ठितो वरदो भव ।।

पूजनम्- ॐ वरुणाय नमः चन्दनं समर्पयामि । **अक्षतान् । पुष्पाणि । माल्यम् । सौभाग्यद्रव्यम् । धूपम् । दीपम्। नैवेद्यम् । आचमनीयम् । ताम्बूलम्। हिरण्यदक्षिणाम् । आरार्त्तिक्यम् । पुष्पाञ्जलिम् । प्रार्थनापूर्वकनमस्कारान् ।** एवं सम्पूज्यानामिकया **कलशं स्पृष्ट्वाऽभिमन्त्रयेत्- कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा । आयान्तु मम शान्त्यर्थं दुरितक्षयकारिकाः ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन् सन्निधिं कुरु** ।। ततः **''ॐ कलशावाहितदेवताभ्यो नमः''** इत्यनेन पुनः पञ्चोपचारैः सम्पूज्य **प्रार्थयेत्- देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि**

तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥ शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत। पाशहस्त महाबाहो दयां कुरु दयानिधे ॥ (पुण्याहवाचनकलशपूजने विशेषः- **पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥**) प्रार्थनां समर्पयामि । **पूजानिवेदनम्- अनया पूजया कलशस्थवरुणः साङ्गः सपरिवारः प्रीयतां न मम ॥**

पुण्याहवाचनप्रयोगः

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैस्तण्डुलैर्वा यवैरष्टदलं कृत्वा तत्र कलशं सम्पूज्य- **पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥** इति ध्यात्वा सम्पूर्णमथवा कलशं विनाऽपि केवलं **पञ्चप्रैषवाक्यात्मकं** स्वस्तिपुण्याहवाचनं कुर्यात् ।

अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा यजमानो ब्रूयात्- **दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च । तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥** ब्राह्मणा वदेयुः- **तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु,** एवं त्रिवारं सर्वत्र ।। पुनर्यजमानः- **दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च । तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥** ब्रा- **तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु** ।। यज- **दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च । तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥** ब्रा- **तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु** ।। (ततश्चतुरो ब्राह्मणानुपवेश्य तेषां हस्तेषु आचार्यहस्ते वा सुप्रोक्षितादिकरणम्)

यज- **ॐ शिवा आपः सन्तु** । ब्रा- **सन्तु शिवा आपः** । यज- **ॐ सौमनस्यमस्तु** । ब्रा- **अस्तु सौमनस्यम्** । यज- **ॐ अक्षतं चारिष्टं चास्तु** । ब्रा- **अस्त्वक्षतमरिष्टं च** । यज- **ॐ गन्धाः पान्तु** । ब्रा- **सौमङ्गल्यं चास्तु** । यज- **ॐ अक्षताः पान्तु** । ब्रा- **आयुष्यमस्तु** । यज- **ॐ पुष्पाणि पान्तु** । ब्रा- **सौश्रियमस्तु** । यज- **ॐ ताम्बूलानि पान्तु** । ब्रा- **ऐश्वर्यमस्तु** । यज- **ॐ पूगीफलानि पान्तु** । ब्रा- **बहुफलमस्तु** । यज- **ॐ दक्षिणाः पान्तु** । ब्रा- **बहुधनं बहुदेयं चास्तु** । यज- **ॐ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनमायुष्यं चास्तु** । ब्रा- **अस्तु ते दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यम्** । यज- **यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाथर्वणाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये** । ब्रा- **वाच्यताम्** । (ब्राह्मणानां हस्ते अक्षतान्दद्यात् ते च मन्त्रान्ते आशिषो दद्युः ।) **स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्तिधनधान्यसमृद्धिरस्तु । ऐश्वर्यमस्तु बलमस्तु रिपुक्षयोऽस्तु सन्तानवृद्धिसहिता हरिभक्तिरस्तु** ॥ ततो यजमानो ब्राह्मणान् प्रति वदेत्- **व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्** । ब्राह्मणा वदेयुः- **समाहितमनसः स्मः**। यज- **प्रसीदन्तु भवन्तः**। ब्रा- **प्रसन्नाः स्मः** । यज- **ॐ शान्तिरस्तु** । ब्रा- **तथाऽस्तु** (एवं सर्वत्र) । **ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ॐ आरोग्यमस्तु । ॐ शिवमस्तु । ॐ शिवं कर्मास्तु । ॐ कर्मसमृद्धिरस्तु । ॐ धर्मसमृद्धिरस्तु । ॐ वेदसमृद्धिरस्तु । ॐ शास्त्रसमृद्धिरस्तु । ॐ धनधान्यसमृद्धिरस्तु । ॐ पुत्रपौत्रसमृद्धिरस्तु । ॐ इष्टसम्पदस्तु । ॐ अनिष्टनिरसनमस्तु । ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु । ॐ यच्छ्रेयस्तदस्तु । ॐ उत्तरे कर्मणि निर्विघ्नमस्तु । ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु । ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् । ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु** ॥ पात्रे उदकसेकः-

ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदैवते प्रीयेताम् । ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् । ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्। ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । ॐ श्रीसरस्वत्यौ प्रीयेताम् । ॐ श्रद्धामेधे प्रीयेताम् । ॐ भगवती कात्यायनी प्रीयताम् । ॐ भगवती माहेश्वरी प्रीयताम् । ॐ भगवती ऋद्धिकरी प्रीयताम् । ॐ भगवती सिद्धिकरी प्रीयताम् । ॐ भगवती पुष्टिकरी प्रीयताम् । ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् । ॐ सर्वाः कुलदेवताः प्रीयन्ताम् । ॐ सर्वा ग्रामदेवताः प्रीयन्ताम् ॥ बहिः पूर्वस्याम्- ॐ हताश्च ब्रह्मद्विषः । ॐ हताश्च परिपन्थिनः । ॐ हताश्च विघ्नकर्तारः । ॐ शत्रवः पराभवं यान्तु । ॐ शाम्यन्तु घोराणि । ॐ शाम्यन्तु पापानि । ॐ शाम्यन्त्वीतयः ॥ पुनः पात्रे- ॐ शुभानि वर्द्धन्ताम् । ॐ शिवा आपः सन्तु । ॐ शिवा ऋतवः सन्तु। ॐ शिवा ओषधयः सन्तु । ॐ शिवा वनस्पतयः सन्तु। ॐ शिवा नद्यः सन्तु । ॐ शिवा गिरयः सन्तु । ॐ शिवा अतिथयः सन्तु । ॐ शिवा अग्नयः सन्तु । ॐ शिवा आहुतयः सन्तु । ॐ अहोरात्रे शिवे स्याताम् ॥ यज- ॐ शुक्राङ्गारकबुधबृहस्पति-शनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् । ॐ भगवान्नारायणः प्रीयताम् । ॐ भगवान् पर्ज्जन्यः प्रीयताम् । ॐ भगवान् स्वामी महासेनः प्रीयताम् ।

(अथवा **पञ्चप्रैषवाक्यैरेव** पुण्याहवाचनं कुर्यात्) यजमानो ब्रूयात्- ॐ पुण्याहं वाचयिष्ये । ब्राह्मणाः- वाच्यताम् ३ । यज- ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकम् । वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥ भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्यास्य नूतनप्रासादाङ्गभूतभूम्यादिपूजनसहितशिलास्थापनकर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥ ब्रा- अस्तु पुण्याहम् ३ ॥१॥ यज- पृथिव्यामुद्धृतायां तु

यत्कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्यास्य नूतनमन्दिराङ्गभूतभूम्यादिपूजनसहितशिलास्थापनकर्मणः कल्याणं भवन्तो ब्रुबन्तु ॥ ब्रा- **अस्तु कल्याणम् ॥२॥** यज- **सागरस्य यथावृद्धिर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः॥ भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणायाशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य नूतनप्रासादाङ्गभूतभूम्यादिपूजनसहितशिलास्थापनकर्मणः ऋद्धिं भवन्तो ब्रुबन्तु ॥** ब्रा- **कर्म ऋद्ध्यताम् ॥३॥** यज- **स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा । विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्यास्य नूतनप्रासादाङ्गभूतभूम्यादिपूजनसहितशिलास्थापनकर्मणः स्वस्ति भवन्तो ब्रुवन्तु ॥** ब्रा- **आयुष्मते स्वस्ति ॥४॥** यज- **समुद्रमथनाज्जाता जगदानन्दकारिका । हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्यास्य नूतनप्रासादाङ्गभूतभूम्यादिपूजनसहितशिलास्थापनकर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु ॥** ब्रा- **अस्तु श्रीः ॥५॥** यजमानो हस्ते जलमादाय- **मया कृतेऽस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् महागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु ॥** ब्रा- **अस्तु परिपूर्णः ॥**

अथाभिषेकः- (अविधुराश्चत्वारो ब्राह्मणा आचार्यो वा वाचनकलशाज्जलं निष्कास्य तज्जलेन वा **प्रीयता**मित्यस्य जलेन यथाकालं सपत्नीकयजमानमूर्ध्नि अभिषेकं कुर्युः, अत्र पत्नी वामतः ।)

सहस्राक्षं शतधारमृषिभिः पावनं कृतम् । तेन त्वामभिषिञ्चामि पावमानं पुनातु तत् ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि । ललाटे कर्णयोरक्ष्णोरापो निघ्नन्तु ते सदा ॥ शान्तिः शान्तिः सुशान्तिर्भवतु ।

अमृताभिषेकोऽस्तु ॥ ततो **दक्षिणाप्रदानम्- अभिषेककर्तृकेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये, तेन श्रीकर्माधीशः प्रीयताम् ॥** जलेन- **अनेन पुण्याहवाचनकर्मणा कर्माङ्गदेवता प्रीयतां न मम ॥**

(षोडशमातृकापूजनं वसोर्धारापूजनमायुष्यमन्त्रजपं नान्दीश्राद्धं यथाक्रमं ग्रहस्थापनं ग्रहहोमं च कृताकृतत्वेन कर्तुमिच्छेच्चेत्कुर्यात् ।)

सगणेशषोडशमातृकापूजनम्

रक्तवस्त्रास्तृते पीठे गोधूमैर्निर्मितेषु गणेशार्थपुञ्जेन सह सप्तदशपुञ्जेषु गणेशमावाह्य गौर्यादयः षोडशमातरः स्थाप्याः ।

हस्तेऽक्षतान्गृहीत्वा- **ॐ भूर्भुवः स्वः गणेशाय नमः** गणेशमावाहयामि स्थापयामि **॥ ॐ गौर्यै नमः** गौरीम् **॥१॥ ॐ पद्मायै नमः** पद्माम् **॥२॥ ॐ शच्यै नमः** शचीम् **॥३॥ ॐ मेधायै नमः** मेधाम् **॥४॥ ॐ सावित्र्यै नमः** सावित्रीम् **॥५॥ ॐ विजयायै नमः** विजयाम् **॥६॥ ॐ जयायै नमः** जयाम् **॥७॥ ॐ देवसेनायै नमः** देवसेनाम् **॥८॥ ॐ स्वधायै नमः** स्वधाम् **॥९॥ ॐ स्वाहायै नमः** स्वाहाम् **॥१०॥ ॐ मातृभ्यो नमः** मातॄः **॥११॥ ॐ लोकमातृभ्यो नमः** लोकमातॄः **॥१२॥ ॐ धृत्यै नमः** धृतिम् **॥१३॥ ॐ पुष्ट्यै नमः** पुष्टिम् **॥१४॥ ॐ तुष्ट्यै नमः** तुष्टिम् **॥१५॥ ॐ आत्मकुलदेवतायै नमः** आत्मकुलदेवताम् **॥१६॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँय्यज्ञगूं समिमं दधातु । व्विश्श्वेदेवासऽइहमादयन्तामो॥३म्प्रतिष्ठ ॥ सगणेशगौर्यादि मातरः आवाहिताः सुप्रतिष्ठिता वरदा भवन्तु ॥** इति प्रतिष्ठाप्य यथोपचारैः सम्पूज्य प्रार्थयेत्- **गणेशपूर्विका देव्यो गौर्यादिप्रमुखाः स्मृताः । प्रसीदन्तु हि कल्याण्यो निर्विघ्नं कुरुताध्वरम् ॥** हस्ते जलमादाय- **अनया पूजया सगणेशगौर्यादिमातरः प्रीयन्तां न मम ॥**

वसोर्द्धारा(सप्तघृतमातृका)पूजनम्

कर्मभूमेरग्निकोणे पूर्वे दक्षिणे वा काष्ठपीठस्य उपरि प्रसारितांशुके वा वसोर्धाराप्रतीकं विधाय सप्तसु बिन्दुषु सर्पिषा आम्रपल्लवादिना सप्तघृतधाराः प्रादेशमात्राः पातयित्वा गुडेनैकीकृत्य तासूत्तरक्रमेण घृतमातृणामावाहनं यथोपचारैः पूजनं च कुर्यात् । तथाहि- **ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा ॥** इत्यनेन सप्त धाराः कृत्वा ततो धारोर्ध्वभागे **'कामधुक्षः'** इत्यनेन मन्त्रखण्डेन गुडादिना एकीकरणम् । ततः सप्तसु बिन्दुषु उत्तरोत्तरक्रमेण एकैकदेवतामावाहयेत् । तद्यथा- दक्षिणस्थे (पश्चिमस्थे वा) प्रथमबिन्दौ श्र्यावाहनम्- **ॐ भूर्भुवः स्वः श्रियै नमः** श्रियमावाहयामि स्थापयामि ॥१॥ **तदुत्तरे (पूर्वस्मिन्वा) बिन्दौ ॐ लक्ष्म्यै नमः** लक्ष्मीम् ॥२॥ **ॐ धृत्यै नमः धृतिम्** ॥३॥ **ॐ मेधायै नमः** मेधाम् ॥४॥ **ॐ स्वाहायै नमः** स्वाहाम् ॥५॥ **ॐ प्रज्ञायै नमः** प्रज्ञाम् ॥६॥ **ॐ सरस्वत्यै नमः** सरस्वतीम् ॥७॥ एवमावाहनं कृत्वा तत्र मध्यमातृकोपरि गुडेन रौप्यमुद्रां स्थापयेत्तत्र मन्त्रः- **यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् । परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान्** ॥ ततः **प्रतिष्ठापनम्- ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमन्तनोत्वरिष्टँय्यज्ज्ञग्गूं समिमं दधातु । व्विश्श्वेदेवासऽइहमादयन्तामो॥३म्प्रतिष्ठ** ॥ **'वसोर्धारादेवता आवाहिताः सुप्रतिष्ठिता वरदा भवन्तु'** इति प्रतिष्ठाप्य यथोपचारैः सम्पूज्य प्रार्थयेत्- **यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः । कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्** ॥ जलेन- **अनया पूजया वसोर्धारादेवताः प्रीयन्तां न मम।**

आयुष्यमन्त्रजपः

यजमानः- **ॐ अद्य अमङ्गलशान्तिपूर्वकं मङ्गलप्राप्त्यर्थं ब्राह्मणद्वारा आयुष्यमन्त्रजपं करिष्ये ॥**

ॐ आयुष्यं व्वर्च्चस्यग्गूं रायस्पोषमौद्भिदम् । इदग्गूं हिरण्यं व्वर्च्चस्व ज्जैत्रायाविशतादुमाम् ॥ आयुस्ते नरवीर वर्द्धतु सदा हेमन्तरात्रिर्यथा लोकानां प्रियदर्शनो भव सदा हेमन्तसूर्यो यथा । शत्रूणामतिदुःसहो भव सदा हेमन्ततोयं यथा नाशं यान्तु तवारयोऽपि सततं हेमन्तपद्मं यथा ॥ स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्तिधनधान्यसमृद्धिरस्तु । ऐश्वर्यमस्तु बलमस्तु रिपुक्षयोऽस्तु सन्तानवृद्धिसहिता हरिभक्तिरस्तु ॥ आयुष्यम् आयुष्यम् आयुष्यम् आयुष्याभिवृद्धिरस्तु ॥ दक्षिणा- **ॐ अद्य आयुष्यमन्त्रजपकर्तृकेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृज्ये ॥**

पिण्डरहितं नान्दीश्राद्धम्

तत्र पत्रावल्युपरि चन्दनेन पूर्वापरास्तिस्रः दक्षिणोत्तरामेकां रेखां विधाय तासामुपरि (प्रत्येकं रेखोपरि) प्रागग्रमुदगग्रं च कुशद्वयं निधेयम् । अत्र सर्वं कर्म सव्येन कार्यम् । ऋजव एव कुशा ग्राह्याः । तिलार्थे यवा देया । नामगोत्रे नोच्चार्ये । स्वधाशब्दस्थाने स्वाहाशब्दोच्चारः कार्यः । **यजमानः-** हस्ते जलादिकमामादाय- **ओमद्य सत्यवसुसंज्ञकविश्वेदेवपूर्वकं साङ्कल्पिकेन विधिना नान्दीश्राद्धं करिष्ये ।** इति सङ्कल्प्य यथाक्रमं चतुर्षु स्थानेषु पाद्यादिकं समर्पयेत् । **पाद्यम्- ॐ सत्यवसुसंज्ञका विश्वदेवा नान्दीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः । ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः । ॐ पितृपितामहप्रपितामहा नान्दीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः । ॐ मातामहप्रमातामहवृद्धमातामहाः सपत्नीकाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ आसनदानम्- ॐ सत्यवसुसंज्ञका विश्वदेवा नान्दीमुखाः इदमासनं वः सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणौ क्रियेतां तथा प्राप्नुतां भवन्तौ, प्राप्नवाव । ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः इदमासनं वः सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणाः क्रियन्तां तथा प्राप्नुवन्तु भवत्यः, प्राप्नवाम । ॐ**

पितृपितामहप्रपितामहाः नान्दीमुखाः इदं वः आसनं सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणाः क्रियन्तां तथा प्राप्नुवन्तु भवन्तः, प्राप्नवाम । ॐ मातामहप्रमातामहवृद्धमातामहाः सपत्नीका नान्दीमुखा इदं वः आसनं सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणाः क्रियन्तां तथा प्राप्नुवन्तु भवन्तः, प्राप्नवाम ।। **गन्धादिदानम्-** **ॐ सत्यवसुसंज्ञकाः विश्वदेवाः नान्दीमुखाः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । ॐ पितृपितामहप्रपितामहाः नान्दीमुखा इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः इदं वो यथादत्तं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ।।** **भोजननिष्क्रयदानम्-** **ॐ सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः इदं वो युग्मब्राह्मणभोजनपर्याप्तान्न-निष्क्रयीभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ मातृपितामही-प्रपितामह्यः नान्दीमुख्यः इदं वो युग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ पितृपितामहप्रपितामहा नान्दीमुखा इदं वो युग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ मातामहप्रमातामहवृद्धमातामहाः सपत्नीका नान्दीमुखा इदं वो युग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ।।** **क्षीरयवजलदानम्-** **सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः प्रीयन्ताम् । मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् । पितृपितामहप्रतिामहा नान्दीमुखाः प्रीयन्ताम् । मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीका नान्दीमुखाः प्रीयन्ताम् ।।** ततश्चतुर्षु स्थानेषु– **'शिवा आपः सन्तु'** इति जलम् । **'सौमनस्यमस्तु'** इति पुष्पाणि । **'अक्षतं चारिष्टं चास्तु'** इत्यक्षतान् ।। **'ॐ अघोराः पितरः सन्तु'** इति पूर्वाग्रां जलधारां दद्यात् । ततः पुष्पाञ्जलिः– पितॄन् प्रार्थयेत्– **गोत्रन्नो वर्द्धतां दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽअस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः सन्तु मा च याचिष्म कञ्चन । एताः सत्याः आशिषः सन्तु ।** ततो ब्राह्मणाः **प्रतिवचनं** दद्युः– **'ॐ सन्त्वेताः सत्या आशिषः'** इति । **दक्षिणादानम्-** **ॐ सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखाः कृतस्याभ्युदयिक-**

नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृज्ये । ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः कृतस्याभ्युदयिक-नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृज्ये । ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः कृतस्याभ्युदयिक-नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृज्ये । ॐ मातामहप्रमातामहवृद्धमातामहाः सपत्नीका नान्दीमुखाः कृतस्याभ्युदयिकनान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृज्ये ।। यजमानः प्रणम्य वदेत्– **अनेन नान्दीश्राद्धं सम्पन्नम् ।** ब्राह्मणा वदेयुः– **सुसम्पन्नम् ।।** यजमानो हस्ते **जलमादाय- अस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनान्नान्दीमुखपितॄणां प्रसादाच्च परिपूर्णोऽस्त्विति भवन्तो ब्रुवन्तु ।** ब्रा– **अस्तु परिपूर्णः ।** पुनर्जलमादाय– **अनेन नान्दीश्राद्धकर्मणा नान्दीमुखसंज्ञका देवपितरः प्रीयन्ताम् ।**

आचार्यादिवरणम्

यजमानः सपत्नीक उदङ्मुख उपविश्य आचार्यं कर्तुं योग्यस्य प्रागुपविष्टस्य विप्रस्य साक्षतेन पाणिना दक्षिणजान्वालभ्य स्वगोत्रोच्चारपूर्वकं तं वृणुयात् ।

तद्यथा– **अद्य अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्मा अमुक-गोत्रोत्पन्नममुकप्रवरान्वितममुकशर्माणं ब्राह्मणमेभिर्वरणसम्भारैः करिष्यमाण-देवालयनिर्माणनिमित्तकभूम्यादिपूजनसहितशिलान्यासकर्मणि आचार्यत्वेन त्वामहं वृणे ।** इति वदन् अक्षतानाचार्यहस्ते दद्यात् । तत आचार्यो यजमानेन दत्तानक्षतान् गृहीत्वा '**वृतोऽस्मीति**' वदेत् ।

ततो यजमानो वृतमाचार्यं सम्पूज्य आचारारद्रक्तसूत्रेण हस्ते कङ्कणबन्धनं कृत्वा प्रार्थयेत्– **आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ।।** '**भवामि**' इत्याचार्यो वदेत् । अन्यब्राह्मणानपि वृणुयात् ।

चतु:षष्टिकोष्ठात्मकवास्तुमण्डलदेवतापूजनम्

हस्ते जलं गृहीत्वा- **अद्य चतु:षष्टिकोष्ठात्मके वास्तुपीठे वास्तुमण्डलदेवतानामावाहनं पूजनं च करिष्ये ।**

तत्रादौ वास्तुपीठस्य आग्नेयादिकोणक्रमेण **शंकुरोपणम् । आग्नेय्याम्- ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वत: । प्रासादेऽत्रावतिष्ठन्तु ह्यायुर्बलकरा: सदा ॥** अनेनैव मन्त्रेण **नैर्ऋत्यां वायव्यामैशान्यां** च शंकुरोपणं कुर्यात् । एवं चतुष्कोणेषु शंकूनारोप्याग्नेयादि क्रमेणैव **माषभक्तं दध्योदनं वा बलिं** दद्यात् ।

आग्नेय्यां शंकुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा- **अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिता: । बलिं तेभ्य: प्रयच्छामि पुण्यमोदनमुत्तमम् ॥१॥** इति जलमुत्सृजेत् । एवं नैर्ऋत्यां शंकुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा- **नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसा: । बलिं तेभ्य: प्रयच्छामि पुण्यमोदनमुत्तमम् ॥२॥** इति जलमुत्सृजेत् । ततो वायव्यां शंकुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा- **नमो वै वायुरक्षोभ्यो ये चान्ये तत्समाश्रिता: । बलिं तेभ्य: प्रयच्छामि पुण्यमोदनमुत्तमम् ॥३॥** इति जलमुत्सृजेत् । तत ऐशान्यां शंकुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा- **रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तत्समाश्रिता: । बलिं तेभ्य: प्रयच्छामि पुण्यमोदनमुत्तमम् ॥४॥** इति जलमुत्सृजेत् । तत आग्नेयादिक्रमेण **''ॐ शंकुदेवताभ्यो नम:'' गन्धं पुष्पं धूपं दीपं नैवेद्यं च समर्पयामि । शेषोपचारार्थे नमस्कारान् निवेदयामि । अनेन शंकुरोपणपूर्वकं बलिदानेन चतस्र आग्नेयादिविदिग्देवता: प्रीयन्तां न मम ॥**

रेखाकरणं पूजनं च- वास्तुपीठे श्वेतवस्त्रं प्रसार्य तदुपरि सुवर्णशलाकया कुशशलाकया वा पश्चिमत आरभ्य प्रागायता उदक्संस्था दक्षिणत आरभ्य उदगायता प्राक्संस्था: समचतुरस्रा नव नव रेखा विदध्यात्। पूर्व पश्चिमत आरभ्य प्रागायता उदक्संस्था नवरेखा: कार्या: । **ॐ लक्ष्म्यै नम: ॥१॥ ॐ यशोवत्यै नम: ॥२॥ ॐ कान्तायै नम: ॥३॥ ॐ सुप्रियायै नम: ॥४॥ ॐ सुकलायै नम: ॥५॥ ॐ शिवायै नम: ॥६॥ ॐ सुभगायै**

नमः ।।७।। ॐ सुमुख्यै नमः ।।८।। ॐ नन्दायै नमः ।।९।। ततो दक्षिणत आरभ्य उदगायताः पूर्वदिक्संस्था नव रेखाः कार्याः- **ॐ धन्यायै नमः ।।१।। ॐ प्राणायै नमः ।।२।। ॐ विशालायै नमः ।।३।। ॐ स्थिरायै नमः ।।४।। ॐ भद्रायै नमः ।।५।। ॐ जयायै नमः ।।६।। ॐ निशायै नमः ।।७।। ॐ विरजायै नमः ।।८।। ॐ विभवायै नमः ।।९।।** हस्ते अक्षतान् गृहीत्वा- रेखादेवताः सुप्रतिष्ठिता वरदा भवत । **ॐ रेखादेवताभ्यो नमः** गन्धाक्षतपुष्पाणि समर्पयामि । सर्वोपचारार्थे नमस्कारान् निवेदयामि । अनेन पूजनेन रेखादेवताः प्रीयन्तां न मम ।।

मध्ये चतुःकोष्टकेऽष्टदले पीते श्वेतवर्णे वा- **ॐ चतुर्मुखोऽरुणो ब्रह्माऽक्षमालास्रुवतोयभृत् । लम्बोदरो हंससंस्थः श्मश्रुलो वास्तुहृत्स्थितः ।। ॐ भूर्भुवः स्वः ब्रह्मणे नमः** ब्रह्माणम् आवाहयामि स्थापयामि **।।१।।** मध्यतः पूर्वपदद्वये कृष्णवर्णे- **अर्यमाऽर्जुनवर्णस्तु दीप्तिमान् रथवाहनः । सुपथमाली खट्वाङ्गी वास्तोर्दक्षस्तनाश्रितः ।। ॐ अर्य्यम्णे नमः** अर्य्यमाणम् ।।२।। मध्यतो दक्षिणपदद्वये शुक्लवर्णे- **विवस्वान् द्विभुजः शोणद्युतिश्चण्डी च पङ्कजी । कर्मसाक्षी रथी वास्तोः क्रोडदक्षिणभागगः ।। ॐ विवस्वते नमः** विवस्वन्तम् ।।३।। मध्यतः पश्चिमपदद्वये शुक्लवर्णे- **हलाब्जध्वजवज्राख्यहस्तो मित्रो हरित्स्थितः । ऊर्ध्वमधः श्यामगौरी वामपाण्यंगुलिस्थितः ।। ॐ मित्राय नमः** मित्रम् ।।४।। मध्यत उत्तरपदद्वये रक्तवर्णे- **सहस्रवदनः श्रीमान् शङ्खचक्राक्षकुम्भधृत् । नीलः पृथ्वीधरो वास्तोर्दक्षहस्तांगुलिस्थितः ।। ॐ पृथ्वीधराय नमः** पृथ्वीधरम् ।।५।। आग्नेय्यां द्विधा कृतोत्तरार्ध एकपदे श्वेतवर्णे- **सावित्रो द्विभुजो पद्मगौरपद्मासनस्थितः । वेदपाठरतो नित्यं वास्तोर्दक्षकरस्थितः ।। ॐ सावित्राय नमः** सावित्रम् ।।६।। आग्नेय्यां द्विधाकृते दक्षिणार्द्ध एकपदे रक्तवर्णे- **सविता जनिता विश्वं द्विबाहुररुणच्छविः । रथगामी पद्मपाणिः वास्तूदककरान्तगः ।। ॐ सवित्रे नमः** सवितारम् ।।७।। नैर्ऋत्यां द्विधा कृते

दक्षिणार्द्धे एकपदे रक्तवर्णे- **सहस्राक्षो गजारूढः पीताङ्गो विबुधाधिपः । वज्रोत्पलकरश्रीमान् वास्तोर्दक्षस्तनाश्रितः ॥ ॐ बिबुधाधिपाय नमः** बिबुधाधिपम् ॥८॥ नैर्ऋत्यां द्विधा कृतोत्तरार्ध एकपदे श्वेतवर्णे- **जयो वज्रधरो देवो महोग्रोऽतुलविक्रमः । पीतवर्णो गजारूढो वास्तोर्मेढ्रे समाश्रितः ॥ ॐ जयाय नमः** जयम् ॥९॥ वायव्यां द्विधा कृते दक्षिणार्ध एकपदे श्वेतवर्णे- **धनुर्बाणसमायुक्तो वरदोऽभयदस्तथा । राजयक्ष्मा च नीलाङ्गो वास्तोर्मेढ्रे समाश्रितः ॥ ॐ राजयक्ष्मणे नमः** राजयक्ष्माणम् ॥१०॥ वायव्यां द्विधा कृतोत्तरार्ध एकपदे रक्तवर्णे- **रुद्रो गोस्थो जटी त्र्यक्षो रुग्वराभयसूत्रधृक् । शुभ्रकृत्यकरो वास्तोर्वामपाणितलस्थितः ॥ ॐ रुद्राय नमः** रुद्रम् ॥११॥ ऐशान्यां द्विधा कृत ईशानपदोत्तरार्ध एकपदे श्वेतवर्णे- **आपो नीलाः पीतवस्त्रा धनगाः पद्मभूषणाः । अक्षाब्जपाशपात्राणि बिभ्रत्यो वास्तुमध्यमाः ॥ ॐ अद्भ्यो** नमः अपः ॥१२॥ ऐशान्यां द्विधा कृत ईशानपददक्षिणार्धे शुक्लवर्णे- **आपवत्सो महातेजा द्विभुजः सिंहवाहनः । वरपाशधरो गौरो वास्तोर्वक्षसि संस्थितः ॥ ॐ आपवत्साय नमः** आपवत्सम् ॥१३॥ ईशानकोण एकपदे रक्तवर्णे- **शिखी कर्पूरधवलस्त्रिनेत्रो वृषवाहनः । वरं त्रिशूलहस्तश्च वास्तोः शिरसि संस्थितः ॥ ॐ शिखिने नमः** शिखिनम् ॥१४॥ तद्दक्षिण एकपदे पीतवर्णे- **स्वस्थस्तडित्वान्पर्जन्यो नानावर्णपरिप्लुतः । ज्योतिर्भूताम्बुवातात्मा वास्तोर्दक्षे दिशि स्थितः ॥ ॐ पर्जन्याय नमः** पर्जन्यम् ॥१५॥ तद्दक्षिणे द्विपदे पीतवर्णे- **जटिलः श्मश्रुलः श्रान्तः कमण्डल्वक्षसूत्रभृत् । जयन्तो ज्यासनो गौरो वास्तोर्दक्षश्रवस्थितः ॥ ॐ जयन्ताय नमः** जयन्तम् ॥१६॥ तद्दक्षिणे द्विपदे पीतवर्णे- **इन्द्र ऐरावतारूढः पीतो दैत्यविमर्दकः । कुलिशाक्षकरो वास्तोरंसस्थलसमाश्रितः ॥ ॐ कुलिशाय नमः** कुलिशायुधम् ॥१७॥ तद्दक्षिणे द्विपदे रक्तवर्णे- **सूर्यो रक्तो ग्रहाध्यक्षो धृताब्जो द्विभुजः प्रभुः । सप्ताश्वरथगो भास्वान् वास्तोर्दक्षांससंस्थितः ॥ ॐ सूर्याय नमः** सूर्यम् ॥१८॥ तद्दक्षिणे द्विपदे

श्वेतवर्णे- **सत्यो भूतहितो धर्मो वरदाभयहस्तकः । प्रसन्नाब्जासनोऽब्जाभो दक्षबााहौ च संस्थितः ॥ ॐ सत्याय नमः** सत्यम् ॥१९॥ तद्दक्षिणे द्विपदे कृष्णवर्णे- **भृशपुष्पविमानस्थः स पुष्पेषु धनुः करः । गौरीनादरतो कामी यो वास्तोर्दक्षबाहुगः ॥ ॐ भृशाय नमः** भृशम् ॥२०॥ तद्दक्षिण एकपदे कृष्णवर्णे- **शङ्खचक्रधरं देवमसितं स्वस्तिकासनम् । सशब्दं सर्वगं व्योम प्रवाहे चैव संस्थितम् ॥ ॐ आकाशाय नमः** आकाशम् ॥२१॥ तद्दक्षिण एकपदे आग्नेयकोणे धूम्रवर्णे- **वायुर्धन्वी मृगारूढो जगत्प्राणश्चलो युवा । अंकुशध्वजबिभ्राणः प्रवाही दण्डसंस्थितः ॥ ॐ वायवे नमः** वायुम् ॥२२॥ तत्पश्चिम एकपदे रक्तवर्णे- **महास्वनः सोष्णवर्णो द्विभुजाब्जकमण्डलुः । पूषा गजासनः शुभ्रो मणिबन्धं समाश्रितः ॥ ॐ पूष्णे नमः** पूषाणम् ॥२३॥ तत्पश्चिमे द्विपदे शुक्लवर्णे- **कृष्णवर्णस्तु वितथः कलेरप्रतिमासनः । मद्यमांसालयो रक्तः करश्चालस्थपार्श्वगः ॥ ॐ वितथाय नमः** वितथम् ॥२४॥ तत्पश्चिमे द्विपदे पीतवर्णे- **गृहक्षतः पाटलाङ्गो गदाऽसिवरचर्मभृत् । पञ्चास्यवाहनः क्रूरो वास्तोर्दक्षकटिस्थितः ॥ ॐ गृहक्षताय नमः** गृहक्षतम् ॥२५॥ तत्पश्चिमे द्विपदे कृष्णवर्णे- **रक्ताक्षो महिषारूढो दण्डपाशधरो यमः। कर्मज्ञो जनसङ्काशो वास्तोर्दक्षिणसंस्थितः ॥ ॐ यमाय नमः** यमम् ॥२६॥ तत्पश्चिमे द्विपदे रक्तवर्णे- **सुष्ठुवेशः शिखी गौरो गन्धर्वो ध्यानवच्छुचिः । वीणाकमण्डलुधरः वास्तोर्दक्षिणजानुगः ॥ ॐ गन्धर्वाय नमः** गन्धर्वम् ॥२७॥ तत्पश्चिमे द्विपदे कृष्णवर्णे- **सुनीलाङ्गो महाकायः कुंकुमारुणविग्रहः। खड्गखेटधरो वास्तोर्दक्षजङ्घासमाश्रितः ॥ ॐ भृङ्गराजाय नमः** भृङ्गराजम् ॥२८॥ तत्पश्चिमे उपरिस्थैकपदे पीतवर्णे- **मृगः कृष्णो भूषिताङ्गो वरदाभयमुद्रिकः । वरासनश्चारुनेत्रो वास्तोर्दक्षिणस्फिक्स्थितः ॥ ॐ मृगाय नमः** मृगम् ॥२९॥ तत्पश्चिमे नैर्ऋत्यकोणपदे रक्तवर्णे- **कुशपिण्डधराः स्वस्थाः पितरः श्यामलाः कराः । महोदराः सोमलोकवासिनो वास्तुपादगाः ॥**

ॐ पितृभ्यो नमः पितृन् ॥३०॥ तदुत्तर एकपदे रक्तवर्णे- **दौवारिको वेत्रमुद्राधरो भूतिविभूषितः । मुक्ताभपादुकारूढो वास्तोर्वामस्फिजि स्थितः ॥ ॐ दौवारिकाय नमः** दौवारिकम् ॥३१॥ तदुत्तरे प्राक्पदे च (द्विपदे) शुक्लवर्णे- **पद्मासनो हेमवर्णो सुग्रीवोऽध्वरगात्रभृत् । द्विभुजः कामदो वास्तोर्वामजङ्घासमाश्रितः ॥ ॐ सुग्रीवाय नमः** सुग्रीवम् ॥३२॥ तदुत्तरे द्विपदे रक्तवर्णे- **पुष्पदन्तोऽभ्रसङ्काशः खगः पक्षविभूषितः । महाबलो व्यालहस्तः श्रीवास्तोर्वामजानुगः ॥ ॐ पुष्पदन्ताय नमः** पुष्पदन्तम् ॥३३॥ तदुत्तरे द्विपदे श्वेतवर्णे- **वरुणो यादसान्नाथो नक्रस्थः पाटलांशुकः । शङ्खपाशधरः शुभ्रो वास्तोर्वामोरुसंस्थितः ॥ ॐ वरुणाय नमः** वरुणम् ॥३४॥ तदुत्तरे द्विपदे पीतवर्णे- **असुरो मेचकाभासो करालास्यागवर्जितः । सिंहारूढो वारुणाक्षो वास्तोर्वामकटिस्थितः ॥ ॐ असुराय नमः** असुरम् ॥३५॥ तदुत्तरे द्विपदे कृष्णवर्णे- **शोषः कृष्णतनुः शूरो वरशूलेषु चापभृत् । गृद्धपक्षः कृशो दीर्घः वास्तोर्वै वामपार्श्वगः ॥ ॐ शोषाय नमः** शोषम् ॥३६॥ तदुत्तरे पश्चिमपदे पीतवर्णे- **पापयक्षो धूम्रवर्णो गदावरदमुद्रिकः । कपोतवाहनो वामे मणिबन्धे समाश्रितः ॥ ॐ पापाय नमः** पापम् ॥३७॥ तदुत्तर एकपदे वायव्ये रक्तवर्णे- **रोगः पाशधरो रक्तः दुरात्मा व्याधिसंग्रहः। दुष्कर्मा मर्दनो वास्तोर्वामदेहेऽथ संश्रितः ॥ ॐ रोगाय नमः** रोगम् ॥३८॥ तदुत्तरे वायव्यात्प्रागेकपदे रक्तवर्णे- **अहिराजोऽब्जबन्धुः फणामणिविराजितः । अक्षकुण्डीधरो वास्तोर्वामबाहौ च संस्थितः ॥ ॐ अहये नमः** अहिम् ॥३९॥ तद्दक्षिणे प्राक्पदद्वये रक्तवर्णे- **मुख्ये स्नुसौ विश्वकर्मा वास्तुकुम्भाक्षसूत्रधृक् । निपुणस्तु लुलायस्थो वास्तुवामभुजाश्रितः ॥ ॐ मुख्याय नमः** मुख्यम् ॥४०॥ तत्प्राक्पदद्वये कृष्णवर्णे- **भल्लाटश्चन्द्रसङ्काशो वरमुद्रागदाधरः । हयपुच्छो वास्तुपुंसोर्वामदोर्मूलदेशगः ॥ ॐ भल्लाटाय नमः** भल्लाटम् ॥४१॥ तत्प्राक्पदद्वये श्वेतवर्णे- **सोमो नरविमानस्थो वरहस्तो गदाधरः । गौरो महोदरः श्रीमान्वास्तोर्वामांशसंस्थितः ॥**

ॐ सोमाय नमः सोमम् ॥४२॥ तत्प्राक्पदद्वये कृष्णवर्णे– **कुम्भमालाधरो द्वाभ्यां चतुर्बाहुः फणामणिः । सर्पो रक्तभ्रमो वास्तोर्वामांसस्थलमाश्रितः ॥ ॐ सर्पाय नमः** सर्पम् ॥४३॥ तत्प्राक्पदद्वये पीतवर्णे– **सूत्रवज्रां कुशाभीतिं बिभ्राणाख्यानभूषिताम् । अदितिं चारुगौराङ्गीं वास्तोर्वामश्रुतिस्थिताम् ॥ ॐ अदित्यै नमः** अदितिम् ॥४४॥ तत्प्रागेकपदे पीतवर्णे– **दितिस्तु श्यामला मालाधारिणी शूलधारिणी । वृषासना वास्तुपुंसोर्वामलोचनसंस्थिता ॥ ॐ दित्यै नमः** दितिम् ॥४५॥ मण्डलाद् बहिरीशाने– **ॐ चरक्यै नमः** चरकीम् ॥४६॥ आग्नेये– **ॐ विदार्यै नमः** विदारीम् ॥४७॥ नैर्ऋत्ये– **ॐ पूतनायै नमः** पूतनाम् ॥४८॥ वायव्ये– **ॐ पापराक्षस्यै नमः** पापराक्षसीम् ॥४९॥ बहिः पूर्वस्याम्– **ॐ स्कन्दाय नमः** स्कन्दम् ॥५०॥ दक्षिणस्याम्– **ॐ अर्यम्णे नमः** अर्यमाणम् ॥५१॥ पश्चिमस्याम्– **ॐ जृम्भकाय नमः** जृम्भकम् ॥५२॥ उत्तरस्याम्– **ॐ पिलिपिच्छाय नमः** पिलिपिच्छम् ॥५३॥ बहिः पूर्वस्याम्– **ॐ इन्द्राय नमः** इन्द्रम् ॥५४॥ आग्नेय्याम्– **ॐ अग्नये नमः** अग्निम् ॥५५॥ दक्षिणस्याम्– **ॐ यमाय नमः** यमम् ॥५६॥ नैर्ऋत्याम्– **ॐ निर्ऋतये नमः** निर्ऋतिम् ॥५७॥ पश्चिमस्याम्– **ॐ वरुणाय नमः** वरुणम् ॥५८॥ वायव्याम्– **ॐ वायवे नमः** वायुम् ॥५९॥ उत्तरस्याम्– **ॐ सोमाय नमः** सोमम् ॥६०॥ ऐशान्याम्– **ॐ ईशानाय नमः** ईशानम् ॥६१॥ ईशानपूर्वयोर्मध्ये– **ॐ ब्रह्मणे नमः** ब्रह्माणम् ॥६२॥ निर्ऋतिवरुणयोर्मध्ये– **ॐ अनन्ताय नमः** अनन्तम् ॥६३॥ ततः **ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमं तनोत्वरिष्ट्टँय्यज्ज्ञग्गूंसमिमन्दधातु । व्विश्श्वेदेवासऽइहमादयन्तामो॥३ँम् प्रतिष्ठ ॥ ब्रह्मादिवास्तुमण्डलदेवता आवाहिताः सुप्रतिष्ठिता वरदा भवन्तु ॥**''

इति प्रतिष्ठाप्य मण्डलोपरि **ताम्रादिपूर्णपात्रसहितकलशं** संस्थाप्य स्वस्य समीपे वास्त्वादिमूर्तीनामग्न्युत्तारणादिकं कुर्यात् ।

हस्ते जलं गृहीत्वा- **अद्य अस्याः वास्तुमूर्तेः निर्माणविधौ अग्निप्रतपनताडनावघातादिदोषपरिहारार्थं अग्न्युत्तारणपूर्वकं देवतासान्निद्ध्यार्थं तत्प्राणप्रतिष्ठां करिष्ये ।** पात्रे मूर्तिं निधाय तां घृतेनाभ्यज्य तदुपरि जलधारां कुर्यात्तत्र मन्त्राः- **ॐ समुद्रस्य त्वा व्वकयाग्ने परिव्व्ययामसि । पावकोऽअस्मब्भ्यग्गूं शिवो भव ॥१॥ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावको अस्मब्भ्यग्गूं शिवो भव ॥२॥ उपज्मन्नुपवेतसेवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमन्नो यज्ञम्पावकवर्णग्गूं शिवं कृधि ॥३॥ अपामिदन्ययनग्गूं समुद्रस्य निवेशनम् । अन्याँस्तेऽअस्मततपन्तु हेतयः पावकोऽअस्मब्भ्यग्गूं शिवो भव ॥४॥ अग्ने पावकरोचिषा मन्द्रया देवजिह्वया । आ देवान्वक्षि यक्षि च ॥५॥ स नः पावक दीदिवोऽग्ने देवाँ इहावह । उपयज्ञग्गूं हविश्च नः ॥६॥ पावक या यश्चितयन्त्या कृपा क्षामन्नुरुचऽउषसो न भानुना । तूर्व्वन्नयामन्नेतशस्य नूरणऽआ यो घृणेन ततृषाणोऽअजरः ॥७॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे । अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मब्भ्यग्गूं शिवो भव ॥८॥ नृषदे व्वेडप्सुषदे व्वेड्बर्हिषदे व्वेड् व्वनसदे वेट् स्वर्विदे वेट् ॥९॥ ये देवा देवानाँय्यज्ञिया यज्ञियानाग्गुँ सम्वत्सरीणमुपभागमासते । अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥१०॥ ये देवा देवेष्वधिदेवत्वमायन्ये ब्रह्मणः पुरऽएतारोऽअस्य । येब्भ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्व्याऽअधिस्नुषु ॥११॥ प्प्राणदाऽअपानदा व्यानदा व्वर्चोदा व्वरिवोदाः । अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मब्भ्यग्गूं शिवो भव ॥१२॥** एवं जलधारां कृत्वा प्राणप्रतिष्ठापनं कुर्यात् । **हस्ते जलं गृहीत्वा- अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुः सामानि छन्दाँसि । पराशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । अस्यां वास्तुमूर्तौ प्राणप्रतिष्ठापने**

विनियोगः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों अस्या मूर्तेः प्राणा इह प्राणाः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों अस्या मूर्तेः जीव इह स्थितः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों अस्या मूर्तेः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।। गर्भाधानादिपञ्चदशसंस्कारार्थं पञ्चदश प्रणवावृत्तिं कुर्यात् । अनया पञ्चदश प्रणवावृत्त्या अस्या मूर्तेः पञ्चदशसंस्काराः सम्पद्यन्ताम् । हस्तेऽक्षतान्गृहीत्वा- ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमन्तनोत्वरिष्टँय्यज्ज्ञगूं समिमं दधातु । व्विश्श्वेदेवासऽ इहमादयन्तामो।।३ँम्प्रतिष्ठ ।। ॐ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ।। वास्तोष्पतिः सुप्रतिष्ठितो वरदो भव । ततो वास्तुमूर्तिमेकस्मिन् पात्रे स्थापयित्वा हस्तेऽक्षतान्गृहीत्वा ध्यानं कुर्यात्- ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवो भवा नः । यत्त्वे महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे ।। ॐ नमो भगवते वास्तुपुरुषाय महाबलपराक्रमाय सर्वदेवाधिवासाश्रितशरीराय ब्रह्मपुत्राय सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपत्तनप्रासादगृहवापीसरःकूपादि सन्निवेशसान्निध्यकाराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय विश्वम्भराय परमपुरुषाय शक्रवरदाय वास्तोष्पते नमस्ते नमस्ते ।। एह्येहि भगवन्वास्तो सर्वदेवैरधिष्ठितः । भगवन् कुरु कल्याणं कार्येऽस्मिन् सर्वसिद्धये ।। जानुनी कूर्परीकृत्य दिशि वातहुताशयोः । आगच्छ भगवन् वास्तो कार्येऽस्मिन् सर्वसिद्धये । भगवन् कुरु कल्याणं कार्येऽस्मिन् सन्निधो भव ।। ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः वास्तुपुरुषम् आवाहयामि स्थापयामि । आसनम् । पाद्यम् । अर्घ्यम् । आचमनीयम् । स्नानम् । पञ्चामृतस्नानम् । शुद्धोदकस्नानम् । आचमनीयम् । ततो वास्तुमूर्ति

वास्तुमण्डलस्य मध्ये स्थापिते कलशे ताम्रादिपूर्णपात्रे निधाय । **वस्त्रम् । वस्त्रोपवस्त्रे । यज्ञोपवीतम् । गन्धम् । गन्धम् । अक्षतान् । पुष्पाणि । पुष्पमालाम् । सौभाग्यद्रव्यम् । धूपम् । दीपम् । नैवेद्यम्** । देवतासमीपे **नैवेद्यं** निधाय गायत्रीमन्त्रेण सम्प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य ग्रासमुद्रया पञ्चप्राणाहुतीर्दद्यात्- **ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा ।। मध्ये पानीयम् । उत्तरापोशानम् । हस्तप्रक्षालनम् । मुखप्रक्षालनम् । करोद्वर्तनार्थे गन्धम् । फलम् । ताम्बूलम् । दक्षिणाद्रव्यम् । नीराजनम्-** एकस्मिन् पात्रे कर्पूरं प्रज्वाल्य गन्धपुष्पैरभ्यर्च्य देवं **नीराजयेत्** । जलेन प्रदक्षिणं कृत्वा **पुष्पैर्वन्दनं हस्तेनात्मवन्दनम् । हस्तं प्रक्षाल्य** । ततो **मन्त्रपुष्पाञ्जलिम् । प्रदक्षिणम् । विशेषार्घः-** एकस्मिन् ताम्रादिपात्रे गन्धाक्षतफलपुष्पसहितं जलं गृहीत्वा तत्र यथाशक्ति हिरण्यं च प्रक्षिप्य तदर्घपात्रं स्वाञ्जलौ आदाय अर्घं दद्यात् । **वास्तुदेव नमस्तेऽस्तु भूशय्यानिरत प्रभो। मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा।। रूपं देहि जयं देहि भाग्यं भगवन्देहि मे । पुत्रान्देहि धनं देहि सर्वान्कामान्प्रदेहि मे ।। यथा मेरुगिरेः शृङ्गे देवानामलयं सदा । तथा ब्रह्मादिदेवानां मम कार्ये सदा भवेत् ।। वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद । अनेन सफलार्घेण फलदोऽस्तु सदा मम ।। ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः** विशेषार्घं समर्पयामि ।। ततः **प्रार्थना- देवेश वास्तुपुरुष सर्वविघ्नविदारण । शान्तिं कुरु सुखं देहि कार्येऽस्मिन् मम सर्वदा ।।** ॐ **भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः** प्रार्थनापूर्वकं नमस्कारान्निवेदयामि ।। **पूजानिवेदनम्-** हस्ते जलं गृहीत्वा- **अनेन यथाशक्ति कृतेन पूजनेन ब्रह्मादिवास्तुमण्डलदेवतासहितो वास्तुपुरुषः प्रीयताम् न मम ।।**

वास्तुमूर्तिसमीपे **ध्रुवं** पूजयेत्- **ॐ ध्रुवोऽसि पृथिवीं दृग्गूंह ध्रुवक्षिदस्यन्तरिक्षं दृग्गूंहाच्युतक्षिदसि दिवं दृग्गूंहाग्ग्ने पुरीषमसि ।।** ॐ **भूर्भुवः स्वः ध्रुवाय नमः** ध्रुवमावाहयामि स्थापयामि । यथोपचारैः **पूजयेत् ।**

ततो वास्तुमण्डलसमीपे एकस्यां पत्रावल्यां वास्तुमण्डलं निर्माय स्थापितक्रमेण ब्रह्मादिवास्तुमण्डलदेवताभ्यः पायसेन तदभावे दध्यक्षतैः कुशपुष्पघृताक्षतैः दुग्धमिश्रिततण्डुलैर्वा सङ्कल्प्य **बलिदानं** दद्यात्- **ॐ ब्रह्मणे** एष बलिर्न मम । **अर्यम्णे । विवस्वते । मित्राय । पृथ्वीधराय । सावित्राय । सवित्रे । विबुधाधिपाय । जयाय । राजयक्ष्मणे ॥१०॥ रुद्राय । अद्भ्यः । आपवत्साय । शिखिने। पर्जन्याय । जयन्ताय । कुलिशाय । सूर्याय । सत्याय । भृशाय ॥२०॥ आकाशाय । वायवे। पूष्णे । वितथाय । गृहक्षताय । यमाय । गन्धर्वाय । भृङ्गराजाय । मृगाय । पितृभ्यः ॥३०॥ दौवारिकाय । सुग्रीवाय । पुष्पदन्ताय । वरुणाय । असुराय । शोषाय । पापाय । रोगाय । अहये । मुख्याय ॥४०॥ भल्लाटाय । सोमाय । सर्पाय । अदित्यै । दित्यै ॥** माषादीन्येकीकृत्य- **चरक्यै । विदार्यै । पूतनायै । पापराक्षस्यै । स्कन्दाय ॥५०॥ अर्यम्णे । जृम्भकाय । पिलिपिच्छाय ॥ पायसादिबलिः- इन्द्राय । अग्नये । यमाय । निर्ऋतये । वरुणाय । वायवे । कुबेराय ॥६०॥ ईशानाय । ब्रह्मणे । अनन्ताय ॥६३॥** नारिकेलं ससुवर्णं बलिद्रव्यमादाय- **नानापक्वान्नसंयुक्तं नानागन्धसमन्वितम् । बलिं गृहाण देवेश वास्तुदोषप्रणाशक ॥** इति बलिं दत्वा प्रार्थयेत्- **मन्त्रहीनं क्रियाहीनं भक्तिश्रद्धाविवर्जितम् । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ नमस्ते वास्तुदेवेश सर्वविघ्नहरो भव । शान्तिं कुरु सुखं देहि सर्वान्कामान्प्रयच्छ मे ॥ अनेन बलिदानेन ब्रह्मादिवास्तुमण्डलदेवतासहितवास्तुपुरुषः प्रीयतां न मम ।**

भूमिकूर्मानन्तवराहपूजनम्

पृथक्तण्डुलपुञ्जेषु पूर्णपात्रस्योपरि वा पूगीफलानि (स्वर्ण-रजतमयं वास्तुपुरुषं नागं च) स्थापयित्वा पूजयेत् ।

तत्र प्रथमपुञ्जे **भूम्यावाहनम्- ॐ भूरसि भूमिरस्यदितिरसि व्विश्श्वधाया व्विश्श्वस्य भुवनस्य धर्त्री । पृथिवीँय्यच्छ पृथिवीन्दृग्गूंह पृथिवीम्माहिग्गूंसीः।। एह्येहि विश्वेश्वरि विश्वधात्रि वसुन्धरे सर्वजनाश्रये च। संशोभमाने धररत्नबीजे गृहाण पूजां पृथिवीं प्रणौमि ।। ॐ भूर्भुवः स्वः भूम्यै नमः** भूमिमावाहयामि स्थापयामि । **आसनं** समर्पयामि । **पाद्यम् । अर्घ्यम् । आचमनीयम् । स्नानम् । आचमनीयम्। वस्त्रोपवस्त्रम् । आचमनीयम्। यज्ञसूत्रम् । आचमनीयम् । गन्धम् । पुष्पं माल्यञ्च । धूपम् । दीपम् ।** हस्तौ प्रक्षाल्य **नैवेद्यम् । आचमनीयम् । ताम्बूलम्। प्रदक्षिणम् । पुष्पाञ्जलिम् ।** इति सम्पूज्य पात्रे दूर्वागन्धपुष्पाक्षतफलहिरण्यादि सहितमर्घ भूमौ दद्यात्- **आगच्छ सर्वकल्याणि वसुधे लोकधारिणि । उद्धृताऽसि वराहेण सशैलवनकानना ।। मन्दिरं (प्रासाद) कारयाम्यद्य त्वदूर्ध्वे शुभलक्षणम् । गृहाणार्घं मया दत्तं प्रसन्ना शुभदा भव ।। ॐ भूर्भुवः स्वः भूम्यै नमः** अर्घ समर्पयामि ।। ततोऽञ्जलिं बध्वा प्रार्थयेत्- **शेषमूर्ध्नि स्थितां रम्यां नानासुखविधायिनीम् । विश्वधात्रीं महाभागां विश्वस्य जननीं पराम् ।। पूजाभागं प्रतीक्षस्व सुखार्थं प्रणमाम्यहम् । तवोपरि करिष्यामि मन्दिरं सुमनोहरम् ।। क्षन्तव्यं च त्वया देवि सानुकूला मखे भव । निर्विघ्नं मम कर्मेदं यथा स्यात्त्वं तथा कुरु ।। वसुधेऽनन्तगर्भाऽसि शेषस्योपरिशायिनि । अस्मिन् स्थाने महामाये विघ्नं रक्ष त्वमम्बिके ।।१।।**

ततो द्वितीयपुञ्जे **कूर्मावाहनम्- ॐ यस्य कुम्र्मो गृहे हविस्तमग्ग्ने व्वर्द्धया त्त्वम् । तस्स्मै देवाऽअधिब्ब्रवन्नयं च ब्ब्रह्मणस्स्पतिः ।। क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः । पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्त्तकषायकण्डूः ।। ॐ भूर्भुवः स्वः कूर्माय नमः** कूर्ममावाहयामि स्थापयामि ।। यथाविधि **सम्पूज्यार्घ** दद्यात्- **सर्वलक्षणसम्पन्न सर्वेश कमठाधिप। स्थानं देह्यालयं कर्तुं गृहाणार्घं नमोऽस्तु ते।।**

ॐ भूर्भुवः स्वः कूर्माय नमः अर्घ समर्पयामि ।। ततोऽञ्जलिं बध्वा **प्रार्थयेत्- सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्गपृष्ठतः । बिभ्रत्तदावर्त्तन-मादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ।।२।।**

ततस्तृतीयपुञ्जे **अनन्तावाहनम्- ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ।। एह्येहि नागेन्द्र धराधरेश सर्वामरैर्वन्दितपादपद्म । नानाफणामण्डलराजमान गृहाण पूजां भगवन्नमस्ते ।। ॐ भूर्भुवः स्वः अनन्ताय नमः** अनन्तमावाहयामि स्थापयामि ।। यथाविधि **सम्पूज्यार्घ** दद्यात्- **हिमकुन्दप्रतीकाश नागानन्त महाफणिन् । स्थानं देह्यालयं कर्तुं गृहाणार्घ नमोऽस्तु ते ।। ॐ भूर्भुवः स्वः अनन्ताय नमः** अर्घ समर्पयामि ।। ततोंऽजलिं बध्वा प्रार्थयेत्- **अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः । नमोऽस्तु पद्मनाभाय नागानां पतये नमः ।।३।।**

ततश्चतुर्थपुञ्जे वराहावाहनम्- **ॐ खड्ड्गो व्वैश्श्वदेवः श्वा कृष्णः कर्ण्णो गर्द्दभस्तरक्षुस्ते रक्क्षसामिन्द्राय सूकरः सिग्गूंहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्वयायै व्विश्श्वेषां देवानां पृषतः ।। यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनन्तः । अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाऽद्रिभिरिव वज्रधरो दधार ।। ॐ भूर्भुवः स्वः वराहाय नमः** वराहमावाहयामि स्थापयामि ।। यथाविधि सम्पूज्यार्घ दद्यात्- **अध्वरायुधरूपस्त्वं पृथिव्युद्धारकारक । त्रायस्व भगवन्दंष्ट्रिन् गृहाणार्घ नमोऽस्तु ते ।। ॐ भूर्भुवः स्वः वराहाय नमः** अर्घ समर्पयामि ।। ततोऽञ्जलिं बध्वा प्रार्थयेत्- **जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः । यद्रोमरन्ध्रेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते**

।।४।। सम्प्रार्थ्य **भूम्यादीनामुत्तरपूजनं** कुर्यात् । **अथवा** तन्त्रेण **'ॐ भूर्भुवः स्वः भूमिकूर्मानन्तवराहदेवताभ्यो नमः ।'** इति **षोडशोपचारैः सम्पूज्यार्घं** दद्यात् । ततः षोडशोपचारैः **प्रासादप्रमुखदेवतापूजनं** कुर्यात् ।

विश्वकर्मपूजनम्

तण्डुलपुञ्जोपरि- **ॐ व्विश्श्वकर्म्मन्हविषा व्वर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् । तस्म्मै व्विशः समनमन्त पूर्व्वीरयमुग्ग्रो व्विहव्यो यथासत् । उपयाम गृहीतोऽसीन्द्राय त्त्वा व्विश्श्वकर्म्मणऽएष ते योनिरिन्द्राय त्त्वा व्विश्श्वकर्म्मणे ।। ॐ भूर्भुवः स्वः विश्वकर्मणे नमः** विश्वकर्माणमावाहयामि स्थापयामि । इत्यावाह्य- **ॐ भूर्भुवः स्वः विश्वकर्मणे नमः** इति यथोपचारैः सम्पूज्य नमस्कुर्यात् ।

सूत्रकारपूजनम्

ॐ सूत्रकाराय नमः इति सूत्रकारं गन्धाक्षतपुष्पैः सम्पूज्य नमस्कुर्यात् ।

गजपूजनम्

हस्ते अक्षतान् गृहीत्वा तत्र देवानावाहयेत्- **ॐ भूर्भुवः स्वः महादेवाय नमः** महादेवमावाहयामि स्थापयामि ।१। **ॐ वायवे नमः** वायुम् ।२। **ॐ विश्वेभ्यो देवेभ्यो नमः** विश्वान्देवान् ।३। **ॐ अग्नये नमः** अग्निम् ।४। **ॐ ब्रह्मणे नमः** ब्रह्माणम् ।५। **ॐ सूर्याय नमः** सूर्यम् ।६। **ॐ रुद्राय नमः** रुद्रम् ।७। **ॐ यमाय नमः** यमम् ।८। **ॐ विश्वकर्मणे नमः** विश्वकर्माणम् ।९। **ॐ वसुभ्यो नमः** वसून् ।१०। **ॐ गणेशाय नमः** गणेशम् ।११। **ॐ वरुणाय नमः** वरुणम् ।१२। **ॐ स्वामिकार्तिकाय नमः** स्वामिकार्तिकम् ।१३। **ॐ इच्छायै नमः** इच्छाम्

।१४। **ॐ क्रियायै नमः** क्रियाम् ।१५। **ॐ ज्ञानाय नमः** ज्ञानम् ।१६। **ॐ कुबेराय नमः** कुबेरम् ।१७। **ॐ चन्द्राय नमः** चन्द्रम् ।१८। **ॐ जयायै नमः** जयाम् ।१९। **ॐ वरुणाय नमः** वरुणम् ।२०। **ॐ वासुदेवाय नमः** वासुदेवम् ।२१। **ॐ बलभद्राय नमः** बलभद्रम् ।२२। **ॐ कामाय नमः** कामम् ।२३। **ॐ विष्णवे नमः** विष्णुम् ।२४। इत्यावाह्य '**ॐ गजस्थावाहितमहादेवादिदेवताभ्यो नमः**' इत्येता देवताः सम्पूज्य नमस्कुर्यात् ।

खनित्रपूजनम्

त्वष्ट्रा विनिर्मितः पूर्वं लोकानां हितकाम्यया । पूजयामि खनित्र त्वां सिद्धिदो भव मे सदा ॥ इत्यक्षतैरावाह्य– '**ॐ खनित्राय नमः**' इति खनित्रं सम्पूज्य नमस्कुर्यात् ।

अग्निस्थापनम्

सपत्नीको यजमानः स्थण्डिलसमीपे आगत्य उपविशेत् । ततः पञ्चगव्ययुतकुशोदकेनात्मानं हवनसामग्रीं च सम्प्रोक्ष्य सङ्कल्पं कुर्यात्– **ॐ अद्य अमुकगोत्रः अमुकशर्माऽहं (वर्मा, गुप्तः) करिष्यमाणमन्दिरप्रासादार्थं भूम्यादिपूजनकर्मणः साङ्गतासिद्धये हवनकर्म करिष्ये । तदर्थं पञ्चभूसंस्कारपूर्वकं वरदनामाग्निस्थापनं करिष्ये ।** तत आचार्यस्तदाज्ञया कश्चिद्विप्रो वा स्थण्डिले भूमिं स्थण्डिलदेवतां च सम्पूज्य पञ्चभूसंस्कारपूर्वकं वरदनामाग्निं स्थापयेत्। ततो दक्षिणहस्तेन त्रिभिः कुशैः प्राक्संस्थमुदक्संस्थं वा त्रिः परिसमूह्य, तान् कुशान् कुण्डाद्बहिः पूर्वस्यामीशान्यां वा परित्यज्य, गोमयोदकाभ्यां त्रिः संलिप्य, हस्तं प्रक्षाल्य स्रुवमूलेन प्रागग्रमुत्तरोत्तरक्रमेण प्रादेशपरिमाणा षडंगुलान्तरालास्तिस्रः रेखाः कृत्वा उल्लेखनक्रमेण अनामिकांगुष्ठाभ्यां

त्रिवारं मृदमुद्धृत्य वामहस्ते धृत्वा दक्षिणहस्तेन ईशानकोणे प्रक्षिप्य उदकेन न्युब्जमुष्टिना प्राजापत्यतीर्थेन त्रिरभ्युक्ष्य, पात्रयुग्मेन सम्पुटीकृतं गोष्ठाद् गृहाद्वा अग्निमादाय पात्रमु**द्धाट्य** प्रदीप्तं ब**ह्वङ्गा**रमयं निर्धूमं वरदनामाग्निं स्थण्डिलादाग्नेय्यामीशान्यां वा निधायाचार्यः **'हुं फट्'** इति मन्त्रेण क्रव्यादांशं नैर्ऋत्यां क्षिप्त्वा अग्निं कुण्डस्योपरि त्रिवारं भ्रामयित्वा स्वाभिमुखं स्थापयेत् । (आचारात् अग्न्याहरणपात्रे साक्षतोदकं निषिच्य तत्र किञ्चिद् द्रव्यं निक्षिप्य यजमानपत्न्यै अन्यसुवासिन्यै वा दद्यात् ।) **वरदनामाग्निमावाह्य** प्रतिष्ठाप्य पूजयेत् । सजलहस्तेन प्रदक्षिणपूर्वकमग्निं सम्मुखं कृत्वा ध्यायेत्- **अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । हिरण्यवर्णममलमनन्तं विश्वतो मुखम् ।। सर्वतः पाणिपादश्च सर्वतोऽक्षिशिरोमुखम् । विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु ।। अग्ने वैश्वानर शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेति त्रिप्रवर भूमिमातः वरुणपितः मेषध्वज प्राङ्मुख मम सम्मुखो भव ।।** तत ऐशान्यां ग्रहादिस्थापनपूजनं कुर्यात् ।

नवग्रहादिस्थापनपूजनम्

(केचिद्वास्तुदेवतापूजनानन्तरं ग्रहस्थापनं कुर्वन्ति, तद्यथाचारं कुर्यात्।) ऐशान्यां ग्रहपीठस्य समीपे सपत्नीको यजमानः पूर्वाभिमुख उपविश्य आचमनादिकं विधाय हस्ते जलं गृहीत्वा- **अद्य अस्मिन् नवग्रहपीठे सूर्यादीनां स्थापनप्रतिष्ठापूजनं करिष्ये ।।** ततो वामहस्ते अक्षतान् गृहीत्वा दक्षहस्तेन तत्तत्स्थाने सूर्यादीनामावाहनं कुर्यात् । तद्यथा मध्ये- **ॐ आकृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ।। ॐ भूर्भुवः स्वः सूर्याय नमः** सूर्यमावाहयामि स्थापयामि ।।१।। अग्निकोणे- **ॐ इमन्देवाऽअसपत्त्वन्नगंू सुवद्ध्वम्महते क्षत्राय महते ज्ज्यैष्ठ्याय महते जानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएष**

वोमी राजा सोमोऽस्माकम्ब्राह्म्मणानाग्गुँ राजा ॥ ॐ सोमाय नमः सोमम् ॥२॥ दक्षिणे- **ॐ अग्ग्निर्म्मूर्द्धा दिवः ककुत्त्पतिः पृथिव्व्याऽअयम् । अपाग्गुँ रेताग्गुँसि जिन्वति ॥ ॐ भौमाय नमः** भौमम् ॥३॥ ईशानकोणे- **ॐ उद्‌द्बुद्ध्यस्वाग्ग्ने प्रतिजागृहि त्त्वमिष्ट्टापूर्त्ते सग्गूंसृजेथामयं च । अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन् व्विश्श्वेदेवा यजमानश्च्च सीदत ॥ ॐ बुधाय नमः** बुधम् ॥४॥ उत्तरे- **ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हा द्द्युमद्द्विभाति क्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजात तदस्म्मासु द्द्रविणन्धेहि चित्रम् ॥ ॐ बृहस्पतये नमः** बृहस्पतिम् ॥५॥ पूर्वे- **ॐ अन्नात्त्परिस्स्रुतो रसम्ब्रह्म्मणा व्व्यपिबत्त्क्षत्रम्पयः सोमम्प्रजापतिः । ऋतेन सत्त्यमिन्द्रियं व्विपानग्गूं शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ ॐ शुक्राय नमः** शुक्रम् ॥६॥ पश्चिमे- **ॐ शन्नो देवीरभिष्ट्टयऽआपो भवन्तु प्रीतये । शँय्योरभिस्स्रवन्तु नः ॥ ॐ शनैश्चराय नमः** शनैश्चरम् ॥७॥ दक्षिणे- **ॐ कया नश्चिच्चत्रऽआभुव दूती सदावृधः सखा । कया शचिष्ठ्ठया वृता ॥ ॐ राहवे नमः** राहुम् ॥८॥ वायुकोणे- **ॐ केतुं कृण्वन्न केतवे पेशो मर्य्याऽअपेशसे । समुषद्‌द्भिरजायथाः ॥ ॐ केतवे नमः** केतुम् ॥९॥

ग्रहदक्षिणपार्श्वे **अधिदेवतास्थापनम्- ॐ ईश्वराय नमः** ईश्वरम् ॥१०॥ **ॐ उमायै नमः** उमाम् ॥११॥ **ॐ स्कन्दाय नमः** स्कन्दम् ॥१२॥ **ॐ विष्णवे नमः** विष्णुम् ॥१३॥ **ॐ ब्रह्मणे नमः** ब्रह्माणम् ॥१४॥ **ॐ इन्द्राय नमः** इन्द्रम् ॥१५॥ **ॐ यमाय नमः** यमम् ॥१६॥ **ॐ कालाय नमः** कालम् ॥१७॥ **ॐ चित्रगुप्ताय नमः** चित्रगुप्तम् ॥१८॥

ग्रहवामपार्श्वे **प्रत्यधिदेवतास्थापनम्- ॐ अग्नये नमः** अग्निम् ॥१९॥ **ॐ अद्भ्यो नमः** अपः ॥२०॥ **ॐ पृथिव्यै नमः** पृथिवीम्

।।२१।। **ॐ विष्णवे नमः** विष्णुम् ।।२२।। **ॐ इन्द्राय नमः** इन्द्रम् ।।२३।। **ॐ इन्द्राण्यै नमः** इन्द्राणीम् ।।२४।। **ॐ प्रजापतये नमः** प्रजापतिम् ।।२५।। **ॐ सर्पेभ्यो नमः** सर्पान् ।।२६।। **ॐ ब्रह्मणे नमः** ब्रह्माणम् ।।२७।।

पञ्चलोकपालस्थापनम् । राहोरुत्तरतः- **ॐ गणपतये नमः** गणपतिम् ।।२८।। शनेरुत्तरतः- **ॐ दुर्गायै नमः** दुर्गाम् ।।२९।। रवेरुत्तरतः- **ॐ वायवे नमः** वायुम् ।।३०।। राहोर्दक्षिणे- **ॐ आकाशाय नमः** आकाशम् ।।३१।। केतुदक्षिणे- **ॐ अश्विभ्यां नमः** अश्विनौ ।।३२।।

वास्तोष्पतिक्षेत्रपालदशदिक्पालानां स्थापनम् । गुरोरुत्तरे- **ॐ वास्तोष्पतये नमः** वास्तोष्पतिम् ।।३३।। तदुत्तरे- **ॐ क्षेत्राधिपतये नमः** क्षेत्राधिपतिम् ।।३४।। मण्डलाद्बहिः पूर्वे- **ॐ इन्द्राय नमः** इन्द्रम् ।।३५।। अग्निकोणे- **ॐ अग्नये नमः** अग्निम् ।।३६।। दक्षिणे- **ॐयमाय नमः** यमम् ।।३७।। निर्ऋतिकोणे- **ॐ निर्ऋतये नमः** निर्ऋतिम् ।।३८।। पश्चिमे- **ॐ वरुणाय नमः** वरुणम् ।।३९।। वायुकोणे- **ॐ वायवे नमः** वायुम् ।।४०।। उत्तरे- **ॐ सोमाय नमः** सोमम् ।।४१।। ईशानकोणे- **ॐ ईशानाय नमः** ईशानम् ।।४२।। ईशानपूर्वयोर्मध्ये- **ॐ ब्रह्मणे नमः** ब्रह्माणम् ।।४३।। निर्ऋतिपश्चिमयोर्मध्ये- **ॐ अनन्ताय नमः** अनन्तम् ।।४४।।

प्रतिष्ठापनम्- ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमं तनोत्वरिष्टँय्यज्ञगूंसमिमन्दधातु । व्विश्श्वेदेवासऽ इहमादयन्तामो३ँ।।म् प्रतिष्ठ ।। सूर्याद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवत ।।

ततः पूर्वतः **कलशस्थापनं** कृत्वा ग्रहादीन पूजयेत् प्रार्थयेच्च- **आयुश्च विद्यां च यशश्च शौर्यं लक्ष्मीं स्थिरां नीतिदयादियुक्ताम् । पुत्रं च पौत्रं च पदं तथैशं यच्छन्तु यूयं ह्यभयं ग्रहा मे ।। भूयात्कृता या भवतां मया सा**

पूजा सुपूर्णा विधिना स्वशक्त्या । भूयात्तथैवाशु सदाऽस्मदीयं ज्ञातं शुभं यन्मनसाऽपि नैव ॥ ॐ सूर्याद्यावाहितग्रहमण्डलदेवताभ्यो नमः प्रार्थनापूर्वकं नमस्कारान्निवेदयामि ।। **पूजानिवेदनम् ।** हस्ते जलं गृहीत्वा- **अनेन पूजनेन सूर्याद्यावाहितग्रहमण्डलदेवताः प्रीयन्तां न मम ॥**

कुशकण्डिका

अग्नेर्दक्षिणतो ब्रह्मासनमास्तीर्य यजमानो हस्ते ब्रह्मवरणद्रव्याण्यादाय तत्रोत्तरासने ब्रह्माणं वृणुयात्- **ॐ अद्य अमुकगोत्रः अमुकशर्मा अस्मिन् हवनकर्मणि कृताकृतावेक्षणरूपकर्मकर्तुम् अमुकगोत्रम् अमुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवस्त्रादिभिर्ब्रह्मत्वेन त्वामहं वृणे । 'वृतोऽस्मि'** इति प्रतिवचनम् । **'यथाविहितं कर्म्म कुरु'** इति यजमानेनोक्ते- **'करवाणि'** इति प्रतिवचनानन्तरं यजमानोऽग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्याग्निप्रदक्षिणं कारयित्वा वदेत्- ''**अस्मिन् कर्मणि त्वं मे ब्रह्मा भव**'', ''**भवामि**'' इति ब्रह्मा वदेत् । वृतं ब्रह्माणमग्नेः पूर्वतो गमयित्वा पूर्वसंकल्पितदक्षिणासने उपवेशयेत् । ब्रह्मा च वाग्यतो भवेत् ।

प्रत्यक्षब्रह्मणोऽभावे पञ्चाशत्कुशनिर्मितं यथासम्भवकुशमयं वा प्रदक्षिणग्रन्थिकं ब्रह्माणमग्नेः पुरस्तात्पश्चाद्वा आनीय अग्नेर्दक्षिणे पीठादौ प्रागग्रास्तीर्णकुशेषु स्थापयेत् । प्रतिनिधिभूत आचार्यः अग्नेरुत्तरतः पश्चिमभागे प्रणीताप्रणयनं कुर्यात्- तत्र प्रणीतासंस्कारार्थमेकमासनं पूर्वभागे प्रणीताप्रणयनार्थं द्वितीयमासनं प्रागग्रैः कुशैः कल्पयित्वा प्रणीतापात्रं वामहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थजलेनात्माभिमुखं सम्पूर्य कुशैराच्छाद्य पश्चिमासने दक्षिणहस्तेन निधाय अनामिकया तत्पात्रमालभ्य ब्रह्मणो मुखमवलोक्य दक्षिणहस्तेन गृहीत्वा अग्नेरुत्तरतः प्राक्कल्पिते पूर्वासने निदध्यात् । पूर्वादिदिक्षु बहिः समन्ताद् द्वादशांगुलं पञ्चांगुलं वा स्थलं विहाय प्रागग्रैरुदगग्रैश्च त्रिभिस्त्रिभिश्चतुर्भिश्चतुर्भिर्वा कुशैरग्नेः

पुरस्तादुदगग्रैः दक्षिणतः प्रागग्रैः पश्चादुदगग्रैः उत्तरतश्च प्रागग्रैः परिस्तरणं कुर्यात् ।

(ततः पात्रासादनार्थं कुशानास्तीर्य अग्नेः पश्चिमतः प्राक्संस्थानि प्राग्विलानि उदगग्राणि, उत्तरतश्चेदुदक्संस्थानि उदग्विलानि, प्रागग्राणि कार्यक्रमेण द्वन्द्वमासादयेत् । तथाहि– पवित्रच्छेदनार्थं त्रीणि कुशतरुणानि, द्वे पवित्रे साग्रे, प्रोक्षणीपात्रं, आज्यस्थाली, सम्मार्जनकुशास्त्रयः पञ्च वा, उपयमनकुशास्त्रिप्रभृतयः त्रयोदशान्ताः, प्रादेशमिताः पालाश्यः समिधस्तिस्रः स्रुवः खादिरः, गव्यमाज्यं, पूर्णपात्रं (षट्पञ्चाशदधिकशतद्वयमुष्टिमितम्), नवग्रहसमिधः, पञ्च बिल्वफलानि (बिल्वबीजानि वा) पायसादि यथासम्भवं बलयः कर्मोपयोगिनी दक्षिणा उपकल्पनीयानि द्रव्याणि स्थापयेत्।)

पवित्रे कृत्वा प्रागग्रयोर्द्वयोः पवित्रयोरुपरि उदगग्राणि त्रीणि पवित्राणि निधायोपरि प्रादेशमात्रमवशेषयित्वा अधोभागे द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलाग्राणि एकीकृत्य नखैरस्पृशन् अनामिकांगुष्ठेन द्वयोरग्रे छेदयेत् । द्वे ग्राह्ये, द्वयोर्मूले त्रीणि चोत्तरतः क्षिपेत् । तत्र ग्रन्थिं कुर्यात् सूत्रादिना बध्नीयाद् वा अविश्लेषाय । ततः प्रोक्षणीपात्रं प्रणीतासन्निधावुत्तरतो निधाय तत्र पात्रान्तरेण हस्तेन सपवित्रेण प्रणीतोदकमासिञ्च्य हस्तद्वयस्य अंगुष्ठानामिकाभ्यां धृतपवित्राभ्यामप उत्पूय पवित्रे प्रोक्षणीपात्रे निधाय सव्यहस्तेन प्रोक्षणीपात्रं धृत्वा दक्षिणकरेण तत्पात्रमपिधाय नासिकासमं धृत्वा दक्षिणहस्तमुत्तानीकृत्य मध्यमाऽनामिकांगुल्योः मध्यपर्वभ्यां जलस्योच्छालनं कृत्वा प्रणीतोदकेन प्रोक्षेत् । ततः पवित्राभ्यां प्रोक्षणीजलेन आज्यस्थालीमुत्तानहस्तेन अमुष्टीकृतेन देवतीर्थेन सम्प्रोक्ष्य सम्मार्जनकुशान्, उपयमनकुशान्, समिधस्तिस्रः, स्रुवम्, आज्यं, पूर्णपात्रं, दक्षिणां च सादनक्रमेणैकैकशः सम्प्रोक्ष्य असञ्चरदेशे (अग्निप्रणीतयोर्मध्ये) सपवित्रं प्रोक्षणीपात्रं स्थापयेत् ।

ततो ब्रह्मा आज्यस्थाल्यामाज्यं गृहीत्वा तत्र पवित्रे निधाय चरुस्थाल्यां त्रिप्रक्षालितान् तण्डुलान्प्रक्षिप्य प्रणीतोदकेनासिञ्च्य अन्यदपि जलं निषिच्य चरुस्थालीस्थपवित्रे प्रोक्षणीषु निधाय कुण्डदक्षिणत आज्याधिश्रयणं कुर्यात् । कुण्डमध्ये एव यजमान आचार्यो वा युगपदुत्तराश्रितमधिश्रयेत् । अर्धश्रित आज्योत्तरतो गृहीतेन ज्वलदुल्मुकेनोभयोरैशानीम् आरभ्यैशानीपर्यन्तं पर्यग्निकरणम् । उल्मुकमग्नौ प्रक्षिप्य हस्तेन इतरथावृत्तिः । अर्धश्रिते चरौ दक्षिणेन स्रुवमधोविलं **प्राञ्चं** प्रतप्य सव्ये पाणौ तमुत्तानं कृत्वा दक्षिणेन सम्मार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं **प्राञ्चं** सम्मृज्य कुशमूलैरधस्ता**द्भा**गे स्रुवपुष्करस्य अग्रभागमारभ्य मूलपर्यन्तं प्रत्य**ञ्चं** सम्मृज्य सम्मार्जनकुशानग्नौ प्रहरेत् । ततः प्रणीतोदकेन स्रुवमभ्युक्ष्य पुनः प्रतप्यात्मनो दक्षिणतः कुशोपरि निदध्यात् । आज्यमुत्तार्य चरोः पूर्वेणोत्तरतो नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः पश्चिमे निधाय चरुमुत्थाप्य पूर्वेणाग्नेरुत्तरतः आनीय आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतो निधाय आज्यमग्नेः पश्चादानीय स्थापयेत्, चरुं च आज्यस्य पूर्वेण प्रदक्षिणमानीय आज्यस्योत्तरत आसादयेत् । अंगुष्ठानामिकाभ्यां धृताभ्यामुदगग्राभ्यां पूर्व पवित्राभ्यामाज्यमुत्पूय अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । ताभ्यामेवाज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम् । पवित्रे प्रोक्षण्यां निदध्यात् । ततः सपवित्रेण दक्षिणचुलूकगृहीतेन प्रोक्षणीजलेन अग्नेरीशानादुत्तरपर्यन्तं सम्प्रोक्ष्य इतरथावृत्तिं कृत्वा पवित्रे प्रणीतासु निदध्यात् । अग्निं प्रदीपयेत् ।

ततो वरदनामाग्निं प्रतिष्ठाप्य- **'ॐ वरदनामाग्नये नमः'** इति पूजयेत्।

तत **आघारावाज्यभागहोमः** । सर्वत्र **संस्रवप्रक्षेपः ।**

अग्नेरुत्तरप्रदेशे वायवीयमारभ्याग्नेयीपर्यन्तम्- **ॐ प्रजापतये स्वाहा** इदं प्रजापतये न मम इति मनसा ।

अग्नेर्दक्षिणप्रदेशे नैर्ऋतिमारभ्यैशानीपर्यन्तम्- **ॐ इन्द्राय स्वाहा** इदमिन्द्राय न मम । इति प्राञ्चाघारौ ।

अग्नेरुत्तरार्द्धपूर्वार्द्धे आज्येन- **ॐ अग्नये स्वाहा** इदमग्नये न मम ।

अग्नेर्दक्षिणार्द्धपूर्वार्द्धे- **ॐ सोमाय स्वाहा** इदं सोमाय न मम । इत्याज्यभागौ हुत्वा **अग्निं पूजयेत्** ।

ततो दक्षिणकरेणोपयमनकुशानादाय वामकरे धृत्वा प्रसारितांगुलिहस्तं हृदि निधाय दक्षिणञ्जान्वाच्य ब्रह्मणान्वारब्धः आदावाज्येन षडाहुतीर्जुहुयात् । उदपात्रे **संस्रवः** । आज्येन- **ॐ इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ।।** इदमग्नये न मम ।।१।। **ॐ उपसृजन्धरुणं मात्रे धरुणो मातरन्धयन् । रायस्पोषमस्मासु दीधरत् स्वाहा ।।** इदमग्नये न मम ।।२।। **ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ।।** इदं वास्तोष्पतये न मम ।।३।। **ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ।।** इदं वास्तोष्पतये न मम ।।४।। **ॐ वास्तोष्पते शग्ग्मयासग्गूं सदा ते सक्षीमहिरण्वया गातुमत्या। पाहि क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा ।।** इदं वास्तोष्पतये न मम।।५।। **ॐ अमीवहा वास्तोष्पते विश्वारूपाण्याविशन्। सखा सुशेव एधि नःस्वाहा ।।** इदं वास्तोष्पतये न मम ।।६।।

ततः स्थालीपाकेन **त्यागमुच्चरन् संस्रवं विना** षडाहुतीर्जुहुयात्- **ॐ अग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये सरस्वतीं च व्वाजीं च वास्तु मे दत्त व्वाजिनः स्वाहा ।।** इदमग्नय इन्द्राय बृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाज्यै च न मम ।।१।। **ॐ सर्पदेवजनान् सर्वान् हिमवन्तग्गूं सुदर्शनम् । वसूँश्च रुद्रानादित्यानीशानं जगदैः सह । एतान् सर्वान्**

प्रपद्येऽहं वास्तु मे दत्त व्वाजिनः स्वाहा ।। इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्यश्च ईशानाय जगदेभ्यश्च न मम **।।२।। ॐ पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह । प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम् । एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त व्वाजिनः स्वाहा ।।** इदं पूर्वाह्णायापराह्णाय मध्यन्दिनाय प्रदोषायार्द्धरात्राय व्युष्टायै देव्यै महापथायै च न मम ।।३।। **ॐ कर्त्तारं च विकर्त्तारं व्विश्वकर्माणमोषधींश्च व्वनस्पतीन् । एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त व्वाजिनः स्वाहा ।।** इदं कर्त्रे विकर्त्रे विश्वकर्मण ओषधीभ्यो वनस्पतिभ्यश्च न मम ।।४।। **ॐ धातारं च विधातारं निधीनां पतिग्गूं सह । एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त व्वाजिनः स्वाहा ।।** इदं धात्रे विधात्रे निधीनां च पतये न मम ।।५।। **ॐ स्योनग्गूं शिवमिदं वास्तु मे दत्त ब्रह्मप्रजापती । सर्वाश्च देवताः स्वाहा ।।** इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यश्च न मम ।।६।।

ततो ब्रह्मणान्वारब्धो **वराहुतिं** दद्यात्- **ॐ गणानान्त्वा गणपतिग्गूं हवामहे प्प्रियाणान्त्वा प्प्रियपतिग्गूं हवामहे निधीनान्त्वा निधिपतिग्गूं हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ।। गणपतये स्वाहा ।।** त्यागः- **इदं गणपतये** न मम ।।

त्यागसंकल्पः । कुशादीन्यादाय- **इदं सम्पादितं हविर्द्रव्यं या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम ।।**

(ग्रहहोमः कृताकृतः) ततो नवग्रहसमिद्भिः समिच्चरुतिलाज्यद्रव्यैश्च आहुतीर्दद्यात् ।

अष्टाष्टाहुतयो ग्रहाणाम्- ॐ सूर्याय स्वाहा । ॐ सोमाय स्वाहा । ॐ भौमाय स्वाहा । ॐ बुधाय स्वाहा । ॐ बृहस्पतये स्वाहा । ॐ शुक्राय स्वाहा । ॐ शनैश्चराय स्वाहा । ॐ राहवे स्वाहा । ॐ केतवे स्वाहा ।।९।।

चतस्रश्चतस्रः अधि-प्रत्यधिदेवतानाम्- ॐ ईश्वराय स्वाहा । ॐ उमायै स्वाहा । ॐ स्कन्दाय स्वाहा । ॐ विष्णवे स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ इन्द्राय स्वाहा । ॐ यमाय स्वाहा। ॐ कालाय स्वाहा । ॐ चित्रगुप्ताय स्वाहा ।।१८।। ॐ अग्नये स्वाहा । ॐ अद्भ्यः स्वाहा । ॐ पृथिव्यै स्वाहा । ॐ विष्णवे स्वाहा । ॐ इन्द्राय स्वाहा । ॐ इन्द्राण्यै स्वाहा । ॐ प्रजापतये स्वाहा । ॐ सर्पेभ्यः स्वाहा । ॐ ब्रह्मणे स्वाहा ।।२७।।

द्वे द्वे आहुती- ॐ गणपतये स्वाहा । ॐ दुर्गायै स्वाहा । ॐ वायवे स्वाहा । ॐ आकाशाय स्वाहा । ॐ अश्विभ्यां स्वाहा ।।३२।। ॐ वास्तोष्पतये स्वाहा । ॐ क्षेत्राधिपतये स्वाहा ।।३४।। ॐ इन्द्राय स्वाहा । ॐ अग्नये स्वाहा । ॐ यमाय स्वाहा । ॐ निर्ऋतये स्वाहा । ॐ वरुणाय स्वाहा । ॐ वायवे स्वाहा । ॐ सोमाय स्वाहा । ॐ ईशानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ अनन्ताय स्वाहा ।।४४।।

वास्तुमण्डलदेवतानामेकैकाहुतिः- ॐ ब्रह्मणे स्वाहा । ॐ अर्यम्णे स्वाहा । ॐ विवस्वते स्वाहा । ॐ मित्राय स्वाहा । ॐ पृथ्वीधराय स्वाहा । ॐ सावित्राय स्वाहा । ॐ सवित्रे स्वाहा । ॐ विबुधाधिपाय स्वाहा । ॐ जयाय स्वाहा । ॐ राजयक्ष्मणे स्वाहा ।।१०।। ॐ रुद्राय स्वाहा । ॐ अद्भ्यो स्वाहा । ॐ आपवत्साय स्वाहा । ॐ शिखिने स्वाहा । ॐ पर्जन्याय स्वाहा । ॐ जयन्ताय स्वाहा । ॐ कुलिशाय स्वाहा । ॐ सूर्याय स्वाहा । ॐ सत्याय स्वाहा । ॐ भृशाय स्वाहा ।।२०।। ॐ आकाशाय स्वाहा । ॐ वायवे स्वाहा । ॐ पूष्णे स्वाहा । ॐ वितथाय स्वाहा । ॐ गृहक्षताय स्वाहा । ॐ यमाय स्वाहा । ॐ गन्धर्वाय स्वाहा । ॐ भृङ्गराजाय स्वाहा । ॐ भृगाय स्वाहा । ॐ पितृभ्यो स्वाहा ।।३०।। ॐ दौवारिकाय स्वाहा । ॐ सुग्रीवाय स्वाहा । ॐ पुष्पदन्ताय

स्वाहा । ॐ वरुणाय स्वाहा । ॐ असुराय स्वाहा । ॐ शोषाय स्वाहा । ॐ पापाय स्वाहा । ॐ रोगाय स्वाहा । ॐ अहये स्वाहा । ॐ मुख्याय स्वाहा ॥४०॥ ॐ भल्लाटाय स्वाहा । ॐ सोमाय स्वाहा । ॐ सर्पाय स्वाहा । ॐ अदित्यै स्वाहा । ॐ दित्यै स्वाहा ।

ततः पृथक्पृथक् **पञ्च बिल्वहोमः** अथवा बिल्वबीजहोमः- **ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥१॥ ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥२॥ ॐ वास्तोष्पते शग्ग्मयासग्गूं सदा ते सक्षीमहिरण्वया गातुमत्या । पाहि क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा ॥३॥ ॐ अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् । सखा सुशेव एधि नः स्वाहा ॥** इदं वास्तोष्पतये न मम ॥४॥ **ॐ वास्तोष्पते ध्रुवा स्थूणा सत्रं सोम्यानाम् । द्रप्सो भेत्ता पुरा शश्वतीनामिन्द्रो मुनीनां सखा स्वाहा ॥५॥ ॐ चरक्यै स्वाहा । ॐ विदार्यै स्वाहा । ॐ पूतनायै स्वाहा । ॐ पापराक्षस्यै स्वाहा । ॐ स्कन्दाय स्वाहा ॥५०॥ ॐ अर्यम्णे स्वाहा । ॐ जृम्भकाय स्वाहा । ॐ पिलिपिच्छाय स्वाहा । ॐ इन्द्राय स्वाहा । ॐ अग्नये स्वाहा । ॐ यमाय स्वाहा । ॐ निर्ऋतये स्वाहा । ॐ वरुणाय स्वाहा । ॐ वायवे स्वाहा । ॐ कुबेराय स्वाहा ॥६०॥ ॐ ईशानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ अनन्ताय स्वाहा ।६३। ॐ वरुणाय स्वाहा ।**

अष्टाष्टाहुतयः शिलादेवतानाम्- **ॐ नन्दायै स्वाहा । ॐ अजितायै स्वाहा । ॐ भद्रायै स्वाहा । ॐ अपराजितायै स्वाहा । ॐ जयायै स्वाहा । ॐ शुक्लायै स्वाहा । ॐ पूर्णायै स्वाहा । ॐ सौभागिन्यै स्वाहा ॥**

मन्दिरप्रासादप्रधानदेवतानां **मूलमन्त्रेण अष्टाविंशत्याहुतयः** ।

ततोऽष्टाहुतयः- ॐ ध्रुवाऽसि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्यच्छदिरसि विश्वजनस्यच्छाया स्वाहा **॥**

अष्टाहुतयः- ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः स्वाहा ॥

व्याहृतिहोमः- न्यूनातिरिक्तदोषपरिहारार्थं यथाशक्ति व्याहृतिहोमं करिष्ये । ब्रह्मणान्वारब्धोऽष्टाविंशत्याहुतीर्दद्यात्- **ॐ भूर्भुवः स्वः स्वाहा** इदमग्निवायुसूर्येभ्यो न मम ॥

शिलाधिवासनम्

(कृताकृतम्)

तत्र प्रथमं **जलाधिवासनं** केचिदाचरन्ति- जलसमीपे शिला अवस्थाप्य तदग्रे पञ्चवाक्यैः पुण्याहवाचनं कृत्वा जले पञ्चगव्यं प्रक्षिप्य सर्वाः शिला मूलमन्त्रेण जलेऽधिवासयेत् ।

सङ्कल्पः- **ओमद्य शिलाजलाधिवासकर्मणि गणेशस्मरणपूजनपूर्वकं जलमातृजीवमातृयोगिनीक्षेत्रपालजलवरुणपूजनं करिष्ये । ॐ गणानान्त्वा. ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितगणपतये नमः ।** इति सम्पूज्य- **सिद्धिबुद्धिसहितगणपतये सदीपदधिमाषभक्तबलिं समर्पयामि** इति बलिं दद्यात्।

जले **जलमातृपूजनम्- ॐ मत्स्यै नमः । कच्छप्यै । कूर्म्यै । वाराह्यै । दर्दुर्यै । शिशुमार्यै । ईश्वर्यै ।** इति नाममन्त्रेण सम्पूज्य

सप्ताक्षतपुञ्जेषु **जीवमातृः** पूजयेत्- **ॐ मत्स्यै नमः । हृद्यै । गोधायै । मकर्यै । डुण्डुभ्यै । दर्दुर्यै । जल्यै ।** इति सम्पूज्य

जले **योगिनीं** पूजयेत्- **ॐ चतुःषष्टियोगिनीभ्यो नमः ।**

ततो वायव्यामक्षतपुञ्जोपरि क्षेत्रपालं पूजयेत्- **ॐ क्षेत्रपालाय नमः** इति सम्पूज्य- **क्षेत्रपालाय सदीपदधिमाषभक्तबलिं समर्पयामि** इति बलिं दद्यात् । प्रणमेत्- **क्षेत्रपाल महाबाहो महाबल पराक्रम । क्षेत्राणां रक्षणार्थाय बलिं गृह्ण नमो नमः ॥**

ततो **जल**पूजनम्- **ॐ अद्भ्यो नमः । सप्तसागरेभ्यो । मानसादिसप्तसरोभ्यो । पुष्करादितीर्थेभ्यो । गङ्गादिमहानदीभ्यो ।** इति गन्धाक्षतान् जले क्षिपेत् ।

ततो **वरुण**पूजनम्- **ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुशग्गूं स मा नऽआयुः प्रमोषीः ॥ ॐ वरुणाय नमः** इति सम्पूज्य माषभक्तबलिं दद्यात् ।

ततः पञ्चामृतं गृहीत्वा- **ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥** मन्त्रेण जले क्षिपेत् । जलस्थितं देवं प्रार्थयेत्- **जलाधिवासितो देव मम भाग्योदयं कुरु । त्वदधिष्ठानसंयोगं त्वत्प्रसादात्सुरेश्वर ॥** मुहूर्तमात्रं यथाकालं वा जलेऽधिवासयेत् ।

ततः शिला जलान्निष्कास्य मण्डपप्रादक्षिण्येन मण्डपमानीय नैर्ऋत्याम् **अन्नाधिवासयेत्** । तत्र भूमौ प्रशस्तधान्यं विकीर्य तस्योपरि वस्त्रं प्रसार्य- **ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनुप्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोऽसि ॥** मन्त्रेण शिला अधिवासयेत् । पुनस्ता वस्त्रमाच्छाद्य तदुपरि प्रचुरधान्यं विकिरेत् ।

एवं **शर्कराधिवासं घृताधिवासं पुष्पाद्यधिवासं** च कुर्यात् ।।

शिलास्नपनम्

भद्रपीठे बृहद्वास्तुमालानुसारं **पञ्चशिला:** प्रासादमञ्जरीप्रोक्तकूर्मादि **नवशिला** वा संस्थाप्य **पीठपश्चिमतो** दक्षिणत उदक्संस्थं **षट्कलशस्थापनं** विधाय तेषु क्रमेण **द्वादशमृत्तिका:, पल्लवकषाय:, गोमूत्रम्, गोमयम्, गन्धोदकम्, मिश्रितपञ्चगव्यं** च निक्षिपेत् ।

तत्पुरत: **पञ्चकलशेषु** क्रमेण **दुग्ध-दधि-घृत-मधु-शर्करा:** निक्षिपेत् । तत्पुरत: **पञ्चकलशेषु** गन्धोदकं निक्षिपेत् । तत्पुरत: **षट्कलशेषु** क्रमेण **फल-रत्न-वृषशृङ्गोदक-सप्तधान्य-तीर्थोदक-गन्धोदकानि** निदध्यात् ।

पीठस्याष्टदिक्षु **अष्टकलशेषु** क्रमेण पूर्वत: **क्षारोदक-क्षीरोदक-दध्युदक-घृतोदक-इक्षुरसोदक-सुरोदक-स्वादूदक-गर्भोदकानि** निक्षिपेत् । एवं त्रिंशत्कलशान् संस्थाप्य **'ॐ मही द्यौ: पृथिवी च न इमं यज्ञ मिमिक्षताम् । पिपृतान्नो भरीमभि: ।।'** इति वरुणावाहनान्तं कर्म कृत्वा शिला वस्त्रेणाच्छाद्यावाह्य गन्धादिभि: **पूजयेत्- ॐ नन्दायै नम:** नन्दाम् आवाहयामि । **ॐ अजितायै नम:** अजिताम् । **ॐ भद्रायै नम:** भद्राम् । **ॐ अपराजितायै नम:** अपराजिताम् । **ॐ जयायै नम:** जयाम् । **ॐ शुक्लायै नम:** शुक्लाम् । **ॐ पूर्णायै नम:** पूर्णाम् । **ॐ सौभागिन्यै नम:** सौभागिनीम् ।। **ॐ शिलादेवता आवाहिता: सुप्रतिष्ठिता भवन्तु । ''ॐ नन्दादिशिलाभ्यो नम:''** इति सम्पूज्य स्नपयेत् ।।

पञ्चप्रैषवाक्यै: पुण्याहवाचनानन्तरं पञ्चगव्येन शिलास्नपनम्- **ॐ आपो हिष्ठा मयोभुवस्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे ।। यो व: शिवतमो रसस्तस्य भाजयते ह न: । उशतीरिव मातर: ।। तस्मा ऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च न: ।।** इति शिला: सम्प्रोक्ष्य प्रासाददेवतामन्त्रेण अभिमन्त्र्य

प्रथमपंक्तितः मृत्तिका- **ॐ अग्ग्निर्म्मूर्द्धा दिवः ककुत्त्पतिः पृथिव्याऽअयम् । अपाग्गुँ रेताग्गुँसि जिन्वति ॥१॥** कषायः- **ॐ यज्ञा यज्ञा वोऽअग्गनये गिरा गिरा च दक्क्षसे । प्र प्प्रवयममृतं जातवेदसं प्प्रियम्मित्रन्न शग्गूंसिषम् ॥२॥** गोमूत्रम्- **ॐ तत्त्सवितुर्व्वरेण्ण्यम्भग्र्गो देवस्य धीमहि । धियो यो नः प्प्रचोदयात् ॥३॥** गोमयम्- **ॐ मा नस्त्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्श्वेषु रीरिषः । मा नो व्वीरान्रुद्द्रभामिनो व्वधीर्हविष्ष्मन्तः सदमित्त्वा हवामहे ॥४॥** गन्धोदकम्- **ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥५॥** पञ्चगव्यम्- **ॐ आयं गौः पृश्श्निरक्क्रदसदन्मातरम्पुनः । पितरं च प्प्रयन्त्स्वः ॥६॥**

द्वितीय-तृतीयपंक्तितः दुग्धम् सर्वत्र शुद्धोदकं च- **ॐ पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्क्षे पयोधाः । पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥** शुद्धोदकम्- **ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्क्कम्भसर्ज्जनीस्त्थो व्वरुणस्यऽऋतसदनन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽ ऋतसदनमासीत् ॥१॥** दधि- **ॐ दधिक्क्राव्ण्णोऽअकारिषं जिष्ण्णोरश्श्वस्य व्वाजिनः । सुरभि नो मुखाकरत्त्प्रणऽआयूग्गुँषि तारिषत् ॥** शुद्धोदकम्- **ॐ सन्ते पयाग्गुँसि समुयन्तु व्वाजाः संव्वृष्ण्ण्यान्यभिमातिषाहः । आप्प्यायमा नोऽअमृताय सोम दिवि विश्श्रवाग्गुँस्युत्तमानि धिष्ष्व ॥२॥** घृतम्- **ॐ घृतम्मिमिक्क्षे घृतमस्य योनिर्घृते श्श्रितो घृतंवस्य धाम । अनुष्ष्वधमावह मादयस्व स्वाहा कृतं व्वृषभ व्वक्षिहव्यम् ॥** शुद्धोदकम्- **ॐ आप्प्यायस्व मदिन्तम सोम व्विश्श्वेभिरग्गुँशुभिः । भवा नः स प्प्रथस्तमः सखा व्वृधे ॥३॥** मधु- **ॐ मधु व्वाताऽऋतायते मधु क्क्षरन्ति सिन्धवः । माद्ध्वीर्नः सन्त्वोषधीः ॥** शुद्धोदकम्- **ॐ तत्त्वा**

यामि ब्ब्रह्म्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः । अहेडमा नो व्वरुणेह बोद्ध्युरुशग्गूं समानऽआयुः प्प्रमोषीः ।।४।। शर्करा- ॐ अपाग्गुँ रसमुद्द्वयसग्गूं सूर्य्ये सन्तग्गूं समाहितम् । अपाग्गुँ रसस्य यो रसस्तं व्वो गृह्णाम्म्युत्तममुपयाम गृहीतोऽसीन्द्राय त्त्वा जुष्ट्टं गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्ट्टतमम् ।। शुद्धोदकम्- ॐ अप्प्स्वग्ग्ने सधिष्ट्टव सौषधीरनुरुद्ध्यसे । गर्ब्भे सञ्ज्जायसे पुनः ।।५।।

चतुर्थपंक्तितः फलम्- ॐ याः फलिनीर्य्याऽअफलाऽअपुष्प्पा याश्च्च पुष्प्पिणीः । बृहस्प्पतिप्प्रसूतास्ता नो मुञ्च्चत्वग्गूंहसः ।।१।। रत्नोदकम्- ॐ परिवाजपतिः कविरग्ग्निर्हव्व्यान्यक्क्रमीत् । दधद्द्रत्क्नानि दाशुषे ।।२।। वृषशृङ्गोदकम्- ॐ आशुः शिशानो व्वृषभो न भीमो घनाघनः क्षोभणश्च्चर्षणीनाम् । संक्क्रन्दनोनिमिषऽएकवीरः शतग्गूं सेनाऽअजयत्त्साकमिन्द्रः ।।३।। सप्तधान्यम्- ॐ धान्यमसि धिनुहि देवान्प्राणाय त्त्वोदानाय त्त्वा व्यानाय त्त्वा । दीर्ग्घामनुप्प्रसितिमायुषे धान्देवो वः सविता हिरण्ण्यपाणिः प्प्रतिगृब्भ्णात्त्वच्छिद्द्रेण पाणिना चक्क्षुषे त्त्वामहीनां पयोऽसि ।।४।। तीर्थोदकम्- ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषंगिणः । तेषाग्गुँ सहस्स्रयोजनेऽव धन्वानि तन्न्मसि ।।५।। गन्धोदकम्- ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।६।।

ततोऽष्टदिक्क्लशैः पूर्वादिक्रमेण क्षारोदकम्- ॐ कया नश्च्चित्रऽआभुव दूती सदावृधः सखा । कया शचिष्ठ्या व्वृता ।।१।। क्षीरोदकम्- ॐ आप्प्यायस्व समेतु ते व्विश्श्वतः सोम व्वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ।।२।। दध्युदकम्- ॐ दधिक्क्राव्ण्णोऽअकारिषं जिष्ण्णोरश्श्वस्य व्वाजिनः । सुरभि नो मुखाकरत्त्प्रणऽआयूग्गुँषि

तारिषत् ॥३॥ घृतोदकम्- **ॐ घृतवती भुवनानामभिश्श्रियोर्व्वी पृत्थ्वी मधुदुघे सुपेशसा । द्यावापृथिवी व्वरुणस्य धर्म्मणा व्विष्क्कभितेऽअजरे भूरिरेतसा ॥४॥** इक्षुरसोदकम्- **ॐ अपाग्गुँ रसमुद्द्वयसग्गूं सूर्य्ये सन्तग्गूं समाहितम् । अपाग्गुँ रसस्य यो रसस्तं व्वो गृह्णाम्म्युत्तममुपयाम गृहीतोऽसीन्द्राय त्त्वा जुष्ट्टं गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्ट्टतमम् ॥५॥** सुरोदकम्- **ॐ सुरावन्तं बर्हिषदग्गूं सुवीरँय्यज्ञग्गूं हिन्वन्ति महिषा नमोभिः । दधानाः सोमन्दिवि देवता सुमदेमेन्द्रँय्यजमानाः स्वर्क्काः ॥६॥** स्वादूदकम्- **ॐ स्वादिष्ठ्ठया मदिष्ठ्ठया पवस्व सोमधारया । इन्द्राय पातवे सुतः ॥७॥** गर्भोदकम्- **ॐ सरस्वती योन्यां गर्ब्भमन्तरश्शिवब्भ्यां पत्क्नीसुकृतम्बिभर्त्ति । अपाग्गुँ रसेन व्वरुणो न साम्म्नेन्द्रग्गुँ श्रियै जनयन्नप्प्सु राजा ॥८॥**

एवं **त्रिंशत्कलशैः** शिलाः संस्नाप्य सर्वतीर्थजलेन- **ॐ ये तीर्त्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाग्गुँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ॐ इमम्मे व्वरुण श्श्रुधी हवमद्द्या च मृडय । त्वामवस्युराचके ॥ ॐ द्यौः शान्तिरन्तरिक्क्षग्गूं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वग्गूं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ॐ सर्वेषां वाऽएष वेदानाग्गुँ रसेन यत्साम सर्वेषामेवैनमेतद्वेदानाग्गुँ रसेनाभिषिञ्चति ॥**

इति संस्नाप्य वस्त्रेण सम्मार्ज्य **नन्दादिषु क्रमेणाष्टदिक्पालान्** पूजयेत्- **ॐ इन्द्राय नमः** आवाहयामि **। ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ कुबेराय नमः । ॐ ईशानाय नमः ॥** इति सम्पूज्य कूर्मशिलायां प्रधानदेवतां चावाह्य- **'ॐ नन्दादिशिलाभ्यो नमः'** इति पूजयेत् ।।

कलशेभ्यः **किञ्चिज्जलं** पात्रान्तरेऽवशेषयेत् ।।

शिलास्थापनम्

प्रासादगर्भगृहगर्त्ते **ईशानाद्यष्टकोणेषु मध्ये** च वितस्तिमानान् कलशनिधानयोग्यान् नव गर्त्तान् विधाय व्रीहिभिरक्षतैर्वा ईशानशिरस्कं निर्ऋतिपादकं वायव्याग्नेययोर्बाहुकूर्परकं हृदयाञ्जलिं **वास्तुपुरुषं** विरचयेत् ।

प्रोक्षणीपात्रस्थसंस्रवशेषभागं स्नपनकलशावशिष्टं वा जलं कलशे प्रक्षिप्य **दर्भैः शिलाप्रोक्षणम्- ॐ आ ब्ब्रह्म्मन्ब्ब्राह्म्मणो ब्ब्रह्म्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्व्योऽतिव्व्याधी महारथो जायतान्दोग्ग्ध्री धेनुर्व्वोढाऽनड्ड्वानाशुः सप्प्तिः पुरन्धिर्य्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्ज्जन्न्यो व्वर्षतु फलवत्त्यो नऽओषधयः पच्च्यन्तां य्योगक्क्षेमो नः कल्प्पताम् ॥१॥ ॐ भद्द्रं कर्ण्णेभिः शृणुयाम देवा भद्द्रम्पश्श्येमाक्क्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्गुँसस्तनूभिर्व्यशेमहि देवहितँय्यदायुः ॥२॥ ॐ जातवेदसे सुनवाम सोममरातीयतो नि दहाति व्वेदः । स नः पर्षदति दुर्ग्गाणि व्विश्श्वानावेव सिन्धुं दुरितात्त्यग्ग्निः ॥३॥ ॐ यमाय त्त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥४॥ ॐ पूर्ण्णा दर्व्विपरापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्क्रीणावहाऽइषमूर्ज्जगूं शतक्क्रतो ॥** एभिर्मन्त्रैः शिलाः प्रोक्षेत् । "**ॐ भद्द्रं कर्ण्णेभिः श्शृणुयाम देवा भद्द्रम्पश्श्येमाक्क्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाग्गुँसस्तनूभिर्व्यशेमहि देवहितँ य्यदायुः ॥**" इति भद्रसूक्तेन "**ॐ इमम्मे व्वरुण श्श्रुधी हवमद्द्या च मृडय। त्त्वामवस्युराचके ॥**" इति वारुणमन्त्रैश्**च पूर्वादिगर्त्तेषु मध्ये** च कलशेन जलं प्रक्षिप्य गन्धपुष्पाक्षतैः सम्पूज्य दधिदूर्वासर्षपहरिद्रागन्धपुष्पफलपञ्चरत्नहिरण्यमुद्रासहितान् साच्छादनान् **नव कलशान्** गर्त्तेषु "**ॐ मनोजूति.**" इति निधाय ईशानकलशे **वास्तुमूर्त्ति नागं**

च संस्थाप्य शिल्पिद्वारा लेपेन समं कृत्वा तत्राधारशिलाः संस्थाप्य तदुपरि पूर्वादिक्रमेण वज्रशक्तिदण्डखड्गपाशांकुशगदात्रिशूलचिह्निता **अष्टशिलामध्ये कूर्मशिलां** च शान्तिमन्त्रान् पठन्तः स्थापयेयुः । शिल्पिद्वारा लेपादिना समसूत्रेषु स्थिरीकुर्यात् ।

यजमानो हस्तेऽक्षतान् गृहीत्वा- पूर्वे- **ॐ नन्दायै नमः, ॐ इन्द्राय नमः ।१।** आग्नेये- **ॐ अजितायै नमः, ॐ अग्नये नमः ।२।** दक्षिणे- **ॐ भद्रायै नमः, ॐ यमाय नमः ।३।** नैर्ऋत्ये- **ॐ अपराजितायै नमः, ॐ निर्ऋतये नमः ।४।** पश्चिमे- **ॐ जयायै नमः, ॐ वरुणाय नमः ।५।** वायव्ये- **ॐ शुक्लायै नमः, ॐ वायवे नमः ।६।** उत्तरे- **ॐ पूर्णायै नमः, ॐ सोमाय नमः ।७।** ईशाने- **ॐ सौभागिन्यै नमः, ॐ ईशानाय नमः ।८।** मध्ये- **ॐ कूर्माय नमः, ॐ प्रासाद(अमुक)देवतायै नमः ।९।** इत्यावाह्य प्रतिष्ठाप्य ''**ॐ नन्दादिभ्यो नमः**'' इति सम्पूज्य शिलासु तत्तद्दिक्पालवर्णानि पूर्वोक्तानि वस्त्राण्याच्छादयेत् ।

प्रतिशिलं सदीपान् माषभक्तपायसबलीन् निधाय ''**ॐ नन्दादिदेवताभ्यो नमः इमान् बलीन् समर्पयामि**'' इति जलं समर्प्य- **भो भो नन्दादिदेवताः इमं बलिं गृह्णीत, मम सपुत्रपरिवारकुटुम्बस्य रक्षाकर्त्र्यः आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः तुष्टिकर्त्र्यः पुष्टिकर्त्र्यः कल्याणकर्त्र्यः स्थिरकर्त्र्यः वरदा भवत ॥** अनेन बलिदानेन नन्दादिदेवताः प्रीयन्ताम ॥

ततः **प्रार्थयेत्- नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम् । मन्दिरे त्विह सन्तिष्ठ यावच्चन्द्रार्कतारकम् ॥ आयुः कामं श्रियं देहि देववासिनि नन्दिनि । अस्मिन् रक्षा त्वया कार्या मन्दिरे यत्नतः सदा ॥१॥ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि । आयुर्दा कामदा देवि सुखदा त्वं सदा भव ॥ त्वामत्र स्थापयाम्यद्य प्रासादे (गृहे) भद्रदायिनि ॥२॥ गर्गगोत्रसमुद्भूतां त्रिनेत्रां च चतुर्भुजाम् । प्रासादे स्थापयाम्यद्य जयां चारुविलोचनाम् ॥ नित्यं जयाय**

भूत्यै च स्वामिनो भव भार्गवि ।।३।। (रिक्ते त्वं रिक्तदोषघ्नि सिद्धिभुक्तिप्रदे शुभे । सर्वदा सर्वदोषघ्नि तिष्ठास्मिँस्तत्र नन्दिनि ।।४।।) पूर्णे त्वं सर्वदा पूर्णान् लोककामाँश्च काश्यपि । आयुर्दा कामदा देवि धनदा सुतदा सदा ।। गृहाधारा वास्तुमयी वास्तुदेवेन संयुता । त्वामृते नास्ति जगतामाधारश्च जगत्प्रिये ।।५।।

ततः सर्वाः **प्रार्थयेत्- यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावत्त्वयाऽत्र देवेशि स्थातव्यं हितकाम्यया ।।**

ततो मण्डपं **होमस्थानं** वाऽऽगत्य **लक्ष्मीहोमं** कुर्यात्- हस्ते जलमादाय- **ॐ अद्य मम गृहे अलक्ष्मीविनाशार्थं दशविधलक्ष्मीप्राप्त्यर्थं च श्रीलक्ष्मीहोममहं करिष्ये ।।**

ततः **सीताफलं क्षीरमाज्यं दाडिमं मधु शर्करां दूर्वां शमीं तण्डुलान् नागवल्लीदलानि कदलीफलानि** च सर्वाण्येकस्मिन् पात्रे एकीकृत्य जुहुयात्- **ॐ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्म्यम् । सनिम्मेधामयाशिषग्गुँ स्वाहा ।।१।। याम्मेधान्देवगणाः पितरश्च्चोपासते । तयामामद्य मेधया मेधाविनं कुरु स्वाहा ।।२।। मेधाम्मे व्वरुणो ददातु मेधामग्ग्निः प्प्रजापतिः । मेधामिन्द्रश्च्च व्वायुश्च्च मेधान्धाता ददातु मे स्वाहा ।।३।। इदम्मे ब्रह्म्म च क्षत्रं चोभे श्रियमश्नुताम् । मयि देवा दधतु श्श्रियमुत्तमान्तस्यै ते स्वाहा ।।४।। मम गृहेऽस्मिन् प्रासादे च लक्ष्मीः स्थिरा भवतु ।**

स्थापितदेवतानामुत्तरपूजनं विधाय **स्विष्टकृद्धोमं** कुर्यात् । तत्र **''ॐ स्वाहास्वधायुताग्नये वैश्वानराय नमः''** इत्यग्निं सम्पूज्य ब्रह्मणान्वारब्धो वामहस्ते महत्पात्रे तिलान् चरून् सर्वशेषं वा गृहीत्वा दक्षिणेन हस्तेन घृतपूर्णं **स्रुवं गृहीत्वोत्थाय- ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ।। तत आज्येन** ब्रह्मणान्वारब्धो **नवाहुतीर्दद्यात् ।**

नवाहुतयस्त्यागश्च- अद्य कृतस्य पूजनकर्मणः साद्गुण्यार्थं सर्वप्रायश्चित्तहवनमहं करिष्ये ।। ॐ भूः स्वाहा इदमग्नये न मम ।१। **ॐ भुवः स्वाहा** इदं वायवे न मम ।२। **ॐ स्वः स्वाहा** इदं सूर्याय न मम

।३। **ॐ त्वन्नोऽअग्ग्ने व्वरुणस्य व्विद्द्वान्देवस्य हेडोऽअवयासिसीष्ट्ठा:। यजिष्ट्ठो व्वह्निन्तम: शोशुचानो व्विश्श्वा द्द्वेषाग्गुँसि प्प्रमुमुग्ग्ध्यस्म्मत् स्वाहा ।।** इदमग्नीवरुणाभ्यां न मम ।४। **ॐ स त्त्वन्नोऽअग्ग्नेऽवमो भवोती नेदिष्ट्ठोऽअस्याऽउषसो व्युष्ट्टौ । अवयक्ष्व नो व्वरुणग्गूं रराणो व्वीहिमृडीकग्गूं सुहवो नऽएधि स्वाहा ।।** इदमग्नीवरुणाभ्यां न मम ।५। **ॐ अयाश्च्चाग्नेस्यनभिशस्त्तिपाश्च्च सत्यमित्त्वमयाऽअसि । अयानो यज्ञँव्वहास्ययानो धेहि भेषजग्गुँ स्वाहा ।।** इदमग्नये अयसे न मम ।६। **ॐ ये ते शतं व्वरुण ये सहस्रं यज्ञिया: पाशा व्वितता महान्त: । तेभिर्न्नोऽअद्द्य सवितोत व्विष्ण्णुर्व्विश्श्वे मुञ्चन्तु मरुत: स्ववर्क्का: स्वाहा ।।** इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम ।७। **ॐ उदुत्तमं व्वरुणपाशमस्म्मदवाधमं व्विमद्ध्यमग्गुँ श्श्रथाय । अथा व्वयमादित्त्यव्व्रते तवानागसोऽअदितये स्याम स्वाहा ।।** इदं वरुणायादित्यायादितये च न मम ।८। **ॐ प्रजापतये स्वाहा** इदं प्रजापतये न मम ।।९।।

बलिदानम्

यजमानो हस्ते **जलं** गृहीत्वा- **अद्य दशदिक्पालानां स्थापितदेवतानां च पूजनपूर्वकबलिदानं करिष्ये ।**

प्राच्यां बलिद्रव्यं निधाय- **इन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकमेभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमासादितं बलिं समर्पयामि । भो इन्द्र दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य यजमानस्याभ्युदयं कुरु । आयु:कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ।** अनेन पूजनपूर्वकबलिदानेन इन्द्र: प्रीयतां न मम ।।१।।

आग्नेय्याम् **अग्नये** ।२। दक्षिणस्यां **यमाय** ।३। नैर्ऋत्यां **निर्ऋतये** ।४। पश्चिमायां **वरुणाय** ।५। वायव्यां **वायवे** ।६। उत्तरस्यां **सोमाय** ।७। ईशान्याम् **ईशानाय** ।८। पूर्वेशानयोर्मध्ये ऊर्ध्वायां **ब्रह्मणे** ।९। निर्ऋतिवरुणयोर्मध्येऽधः **अनन्ताय** ।।१०।।

अथवा **एकतन्त्रेण** सम्पूज्य **बलिं** दद्यात्– **ॐ प्राच्च्यै दिशे स्वाहाऽर्व्वाच्च्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्व्वाच्च्यै दिशे स्वाहा प्प्रतीच्च्यै दिशे स्वाहाऽर्व्वाच्च्यै दिशे स्वाहोदीच्च्यै दिशे स्वाहाऽर्व्वाच्च्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहार्व्वाच्च्यै दिशे स्वाहाऽवाच्च्यै दिशे स्वाहाऽर्व्वाच्च्यै दिशे स्वाहा ।। ॐ भूर्भुवः स्वः इन्द्रादिदशदिक्पालेभ्यो नमः** । इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः ....। आयुःकर्तारः .... भवत ।

ततो **भूम्याद्यावाहितदेवताभ्य** एकस्मिन् पात्रे **पायसादिबलिं** निधाय हस्ते जलं गृहीत्वा– **भूम्याद्यावाहितदेवताभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः अमुं बलिं समर्पयामि** इति जलमुत्सृजेत् ।

अत्राचारात्केचिद् **ध्वजारोहणं** कारयन्ति तदपि सम्पादनीयम् ।

पूर्णाहुतिः

आचान्तः सपत्नीको यजमानः स्थण्डिलस्य पश्चादुपविश्य हस्ते जलं गृहीत्वा– **अद्य मया कृतस्यास्य पूजनकर्मणः सांगतासिद्ध्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये ।।**

आचार्यः कश्चिद्विप्रो वा उत्थाय आज्यपात्रान्नूतनमाज्यमादाय अग्नौ अधिश्रित्य स्रुक्स्रुवौ प्रतत्य सम्मार्जनकुशैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणदेशे निदध्यात् । आज्यमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य पवित्रे प्रणीतासु निदध्यात् । ततः स्रुवेण स्रुचि द्वादशवारं चतुर्वारं वा आज्यं प्रक्षिप्य तदुपरिकर्मापवर्गसमित्सहितं

वस्त्रगन्धपुष्पसौभाग्यद्रव्याद्यलंकृतं नारिकेलं निधाय स्रुचिमूलं वामहस्तेन धृत्वा वामस्तनान्तमानीय तदुपरि अधोमुखं स्रुवं नारिकेलसहितं दक्षिणहस्तेन गृहीत्वा उत्थाय अग्नेः पश्चिमस्यां दिशि तिष्ठन् **पूर्णाहुतिं** जुहुयात्– **ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्या व्वैश्श्वानरमृतऽआजातमग्गिनम् । कविग्गूं सम्म्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ अथ प्रातरहुते वा हुते वा यतरथा कामयेत् । सोऽस्या अनिरशितायै कुम्भ्यै दर्व्यो पहन्ति ॥ पूर्ण्णा दर्व्विपरापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्क्रीणा व्वहाऽइषमूर्ज्जग्गूं शतक्रतो स्वाहा ॥ इदमद्भ्यो वसुरुद्रादित्येभ्यः अग्नये वैश्वानराय सप्तवतेऽग्नये शतक्रतवे च न मम ॥** (इति त्यागोच्चारणपूर्वकं प्रोक्षण्यां **संस्रवप्रक्षेपः** ।)

वसोर्धारा

ततो वह्नेरुपरि स्तम्भद्वयविधृतामौदुम्बरीं सकोटरामार्द्रामृज्वीं चतुर्हस्तां बाहुमात्रां वा स्रुचं धृत्वा तदुपरि शृङ्खलावधृतेन निर्मलघृतपूरित–सच्छिद्रताम्रादिकुम्भेन पात्रान्तरेण वा स्रुच्याज्यं निक्षिपन् अविच्छिन्नघृतधारया वसोर्धाराहोमं कुर्यात् । (आचारात् **स्रुङ्मुखे पूगीफलं** निदध्यात्) **ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्प्वा कामधुक्षः ॥ यत्त्कर्म्मणात्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्गिनष्टत्त्स्विष्ट्टकृद्विद्वान् स्विष्टग्गूं सुहुतं करोतु नः स्वाहा ॥** नात्र **संस्रवप्रक्षेपः**, किन्तु यजमानो वदेत् । **इदमग्नये वाजादिभ्योऽग्नये विष्णवे रुद्राय सोमाय वैश्वानराय च न मम ।**

एवं वसोर्धारां हुत्वा यजमानः करसम्पुटं कृत्वा **प्रधानदेवतां प्रार्थयेत्** । ततः स्वासनोपर्युपविश्य **भस्मधारणं** कुर्यात्– **ॐ त्र्यायुषं जमदग्नेः कश्श्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥ श्रद्धां**

मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम् । तेज आयुष्यमारोग्यं देहि मे हव्यवाहन ॥ भस्मना **ललाटे ग्रीवायां दक्षिणेंऽसे** च **भस्मधारणं** कृत्वा **संस्रवं प्राशयेत्** ।

कुशपवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः ।

ततः प्रणीतोदकेन ब्रह्मणे **पूर्णपात्रदानं** कुर्यात् । यजमानः प्रणीतोदकं गृहीत्वा सङ्कल्पं कुर्यात्- **मया कृतस्यास्य पूजनकर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मणे इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे ।** इति सङ्कल्पजलं सहिरण्यं पूर्णपात्रं च ''**प्रतिगृह्यताम्**'' इति वदन् ''**ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु**'' इति गृह्णीयात् ।।

ततः पश्चात् **प्रणीताविमोकः** । तेन जलेन यजमानशिरसि **मार्जनम्** । **ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥**

पुनरारार्तिकं पुष्पाञ्जलिं प्रदक्षिणनमस्कारान् निवेद्य आचार्यादिभ्यः **कर्मदक्षिणां भूयसीदक्षिणां** च दद्यात् ।

कर्मदक्षिणा

ॐ अद्य कृतस्य मन्दिरप्रासादनिर्माणार्थं भूम्यादिपूजनसहित-शिलान्यासकर्मणः प्रतिष्ठासिद्ध्यर्थमेतावद्द्रव्यमूल्यकं हिरण्यमग्निदैवतं नानानामगोत्रेभ्यः आचार्यादिब्राह्मणेभ्यो दक्षिणां विभज्य दातुमहमुत्सृज्ये ।

भूयसीदक्षिणा

ॐ अद्य कृतस्य मन्दिरप्रासादनिर्माणार्थं भूम्यादिपूजनसहित-शिलान्यासकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणादिभ्यो विभज्य भूयसीं दक्षिणां दातुमहमुत्सृज्ये । इति दद्यात् ।

आशीर्वादाभिषेकः

यजमानरक्षाबन्धनं, यजमानपत्नीरक्षाबन्धनं, यजमानतिलककरणं, यजमानाय यजमानपत्न्यै च **ब्राह्मणैराशीर्वादप्रदानं** कर्तव्यम् । आचार्यो ब्राह्मणैः सह रुद्रकलशप्रधानकलशयोर्जलैर्यजमानाभिषेकं कुर्यात्- **लक्ष्मीस्ते पङ्कजाक्षी निवसतु भवने भारती कण्ठदेशे वर्द्धन्तां बन्धुवर्गाः प्रबलरिपुगणा यान्तु पातालमूले । देशे देशे च कीर्तिः प्रसरतु भवतां पूर्णकुन्देन्दुशुभ्रा जीव त्वं पुत्रपौत्रैः शुभगुणयुतैर्भोज्यतां राज्यलक्ष्मीः ॥**

स्थापितदेवताविसर्जनम्

हस्ते जलाक्षतान् गृहीत्वा- **यान्तु देवगणाः सर्वे पूजामादाय मामिकाम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥**

शिल्पिद्वारा स्थापितशिलानामिष्टपाषाणसिकतालेपादिना स्थिरीकरणं समत्वं च सम्पादयेत् । शिलावस्त्राणां शिल्पिने दानम् । ब्राह्मणभोजनम् ।

॥ इति भूम्यादिपूजनसहितशिलास्थापनप्रयोगः ॥